दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-14 ■ वर्ष-5 ■ अङ्क-325

सितम्बर 14, 2026

Website- www.himsanskritam.com

Email-himsanskrit@gmail.com



**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लतृतीया
भाद्रपद 29 प्रविष्टांशः मङ्गलमयः भवेत्

2 ब्रिक्स्-सङ्घः न तावत् केवलं राष्ट्राणां परिगणित-समुदाय-मात्रः, अपितु वैश्विक- विषमतानां परिहाराय एका अनन्यथासिद्धा समाधान-पारिस्थितिकी-प्रणाली वर्तते - प्रधानमन्त्री

4 हिमाचलस्य भाग्यपत्रिकायां (Lottery) संस्थानां न्यूना रुचिः; २८ सितम्बर-दिनाङ्कं यावत् प्रसारिता निविदा-तिथिः

8 धावनाङ्कान्मिथिला-सांस्कृतिक-परिषदा भव्य-कविसम्मेलनेन मणिपद्मजयन्तीम् आचरितवतीधावनाङ्कान्




## अद्यतनीयं सुभाषितम्

**दिष्ट्या संसारचक्रेऽस्मिन् वर्तमानः पुनर्भवः।**
**उपलब्धो भवानद्य दुर्लभं प्रियदर्शनम्॥**

(श्रीमद्भागवत - १०/०४/२४)

अर्थात्- यह भी बड़े आनंद का विषय है कि आज हम लोगों का मिलना हो गया, अन्यथा इस संसार चक्र में अपने प्रेमियों का मिलना भी बड़ा दुर्लभ है। इसे तो एक प्रकार का पुनर्जन्म ही समझना चाहिए।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

# महिला-एशिया-चषके भारतस्य वर्चस्वम्: अष्टमवारं जितम् शीर्षकम्, अन्तिमक्रीडायां श्रीलङ्का पराजिता






**हिमसंस्कृतवार्ता।** हरमनप्रीत कौरस्या नेतृत्वे भारतीय महिलाक्रिडदलम् उत्कृष्टं प्रदर्शनं कृत्वा अष्टमवारम् एशियाकप-किरीटम् स्वनामधेयं अकरोत्। भारतेन दुबै-नगरे क्रीडितायां अन्तिमस्पर्धायां श्रीलंका ७२ धावकैः पराजिता। भारतीयदलम् समग्रक्रीडायां अजेयं आसीत्, समूहचरणात् अन्तिमस्पर्धापर्यन्तम् उत्कृष्टं प्रदर्शनं अकरोत्। भारतेन २० चक्रेषु पञ्च स्तौभानां हानौ १८३ धावनाङ्काः निर्मिताः। भारतस्य कृते शेफाली वर्मा स्मृति मन्धाना च उत्कृष्टं फलकक्रीडनं कृत्वा अर्धशतकानि रचितवत्यः। प्रत्युत्तरे श्रीलंकायाः दलम् २० चक्रेषु १११ धावनाङ्केषु सर्वथा बहिर्गतम्

## महिला एशियाचषक-स्पर्धायां भारतस्य आधिपत्यम्

एशियाकप-स्पर्धायां भारतीय महिलादलस्य आधिपत्यं तिष्ठति। भारतीयदलम् एकदिवसीयम् वा टी२० भवतु, अस्याः स्पर्धायाः सर्वस्मिन् रूपे सदैव किरीटस्य अन्तिमस्पर्धाम् प्राप्नोति। भारतेन सर्वाधिकम् अष्टवारं किरीटम् स्वनामधेयं कृतम्। भारतेन २००४, २००५, २००६, २००८ तमे वर्षे एकदिवसीय-रूपे तथा २०१२, २०१६, २०२२, २०२६ तमे वर्षे च टी२०-रूपे एशियाचषकं स्वनामधेयं कृतः। तस्मै २०१८ तथा २०२४ तमे वर्षे अन्तिमस्पर्धायां पराजयः प्राप्तः।

## आरम्भिकहान्यानन्तरम् श्रीलंका संहता

लक्ष्यस्य अनुसरणं कुर्वती श्रीलंकायाः आरम्भः उत्तमः नासीत्। क्रान्ति गौड इमिषा दुलानी बोल्ड् कृत्वा श्रीलंकायै प्रथमां हानिम् अयच्छत्। दुलानी चत्वारि धावनाङ्कानि कृत्वा बहिर्गता। ततः परम् दलनायिका चामरी अट्टापट्टू विश्मी गुणारत्ने च प्रतिनिधित्वं गृहीतवत्यौ। उभे अपि फलकक्रीडिके द्वितीयविक्टस्य कृते ५८ धावनाङ्कानां सहभागिताम् अकरोत्। एतां सहभागितां दीप्ति अट्टापट्टू बहिर्कृत्वा अखादयत्। चामरी ३२ कन्दुकैः चतुर्भिः चतुष्कैः द्विभिः षष्कैः च सहाय्येन ३६ धावनाङ्कानि रचितवती।

## मन्धाना-शेफाली इत्यनयोः पराक्रमः

तस्मात्पूर्वं, पणकम् इति जित्वा प्रथमं फलकक्रीडनार्थम् आगतं भारतीयदलं स्मृति मन्धाना शेफाली वर्मा च दृढम् आरम्भम् अयच्छताम्। उभे प्रथमे स्तोभे १२९ धावनाङ्कानां सहभागिताम् अकृतताम्। शेफाली वर्मा अस्मिन् समये टी२०-जीवनस्य एकविंशतिं अर्धशतकं रचितवती। एताम् सहभागितां चामुदी प्रबोदा शेफालीं बहिर्कृत्वा अखादयत्। शेफाली ३९ कन्दुकैः नवभिः चतुष्कैः द्विभिः षष्कैः च सहाय्येन ६८ धावनाङ्कानि कृत्वा बहिर्गता। तस्य किंचित्कालानन्तरम् मन्धाना अपि स्वस्तोभं त्यक्तवती ३९ कन्दुकैः पञ्चभिः चतुष्कैः त्रिभिः षष्कैः च ५९ धावनाङ्कानि कृत्वा बहिर्गता।



# ब्रिक्स्-सङ्घः न तावत् केवलं राष्ट्राणां परिगणित-समुदाय-मात्रः, अपितु वैश्विक-विषमतानां परिहाराय एका अनन्यथासिद्धा समाधान-पारिस्थितिकी-प्रणाली वर्तते - प्रधानमन्त्री

हिमसंस्कृतवार्ता। प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् ब्रिक्स न केवलं राष्ट्राणां समूहः, अपितु समाधानानाम् किञ्चन पारिस्थितिकी-तन्त्रम् अस्ति, विगत-दिन-द्वयस्य गहन-चर्चाभिः अयं दृढ-विश्वासः अधिकः सुदृढः जातः। सुदृढता, नवाचारः, सहकारः, सततविकासश्चेत्येतेषु च विषयेषु आयोजिते ब्रिक्ससत्रे स्वकीय-समापन-भाषणे श्रीमोदी आशां प्राकटयत् यत् शिखर सम्मेलने अङ्गीकृतं नवदिल्ली-घोषणापत्रम् प्रकाशित-दृष्टिकोणेन भविष्यत्-सहकाराय च स्पष्टां दिशं निर्दिशेत्। तेन सर्वाणि परिणामात्मक-लक्ष्याणि समयबद्ध-कार्येषु परिणामयितुम्, अन्त्योदय-प्रभावं जनयितुं च आवश्यकता प्रतिपादिता। सः प्रत्यपादयत् यत् ब्रिक्स-प्रारूपं केवलं अभिलेखीकरणं विहाय वास्तविक जीवने प्रत्यक्ष-प्रभावम् उत्पादयितुं सदस्य-राष्ट्राणि परस्परं मिलित्वा कार्यं करिष्यन्ति।

## नवदिल्ली-घोषणापत्रम्' ब्रिक्स्-देशानां भावि-सहयोगस्य अबाधित-मार्गदर्शकम् - प्रधानमन्त्री ।

ब्रिक्स-सङ्घटनं स्वकीये तृतीये दशके प्रवेष्टुं सज्जम् अस्ति इति निरूपयता श्रीमोदिना दृढतया प्रतिपादितं यत् संसारः अधुना एतस्मात् समूहात् केवलं विचारान् प्रतिश्रुतीः न, अपितु मूर्त-परिणामान् अपेक्षते। सः दृढ विश्वासं प्राकटयत् यत् ब्रिक्स-सङ्घटनं सामूहिक प्रयासैः एतासु अपेक्षासु अवश्यमेव सत्यं सिद्धं भविष्यति । प्रधानमन्त्रिणा आगामि-अध्यक्षरूपेण चीन-देशाय शुभाशयाः समर्पिताः। तेन नवदिल्ली-शिखर सम्मेलनस्य साफल्य-सम्पादनाय सर्वाणि ब्रिक्स-राष्ट्राणि, सहभागि-देशाः, तेषां प्रतिनिधि-मण्डलानि च प्रशंसितानि । प्रधानमन्त्रिणा तेषां सक्रिय-सहभागितायै, बहुमूल्य योगदानाय च कृतज्ञता ज्ञापिता। सः अवोचत् यत् तेषां महत्त्वपूर्णैः विचारैः परामर्शैश्च सहकाराय विस्तारः गाम्भीर्यं च प्रदत्तम् । अस्मात् पूर्व, नवदिल्ल्याः भारत-मण्डपे ब्रिक्स शिखर सम्मेलनस्य सत्रं सम्बोधयता प्रधानमन्त्रिणा मोदिना प्रतिपादितं यत् वैश्विक सङ्क्रमणेन, जलवायु-आपद्भिः, आपूर्ति-शृङ्खलायाः विघ्नैश्च स्पष्टीभूतं यत् अद्यत्वे परस्पर-संयुक्ते जगति कोऽपि सङ्कटः एकस्मिन् एव क्षेत्रे सीमितो न भवति । तेन विज्ञापितं यत् सङ्क्रामक-रोगाणां प्रतिषेधाय ब्रिक्स-एकीकृत-पूर्व-सञ्चेतना-प्रणाल्याः विषये सर्वसम्मतिः सञ्जाता। श्रीमोदिना सावधानता प्रकटिता यत् प्रौद्योगिक्याः अथ च महत्त्वपूर्ण खनिजानां शस्त्रीकरणं प्रगतेः मार्गे महती बाधा भवितुम् अर्हति। सः अवोचत् यत् ब्रिक्स-देशैः प्रौद्योगिक्याः स्वीकारे समावेशकतायां विशेष-बलं दत्तम्। अस्मात् पूर्व प्रधानमन्त्रिणा शिखर सम्मेलनस्य द्वितीये तथा अन्तिमे दिने सहभागि देशानां नेतारः समभिनन्दिताः ।

प्रधानमन्त्री बहुपक्षीय-वार्ताः समाचरत्।

नवदेहल्याः 'भारत-मण्डपम्' प्राङ्गणे निर्वर्त्यमानस्य अष्टादश-ब्रिक्स्-शिखर-सम्मेलनस्य अवसरे, प्रधानमन्त्री नरेन्द्र मोदी वैश्विक मूर्धन्यैः सह अव्यवहिताः द्विपक्षीय-मन्त्रणाः समाचरत्। अस्मिन्नेव क्रमे, मन्त्रिप्रवरेण कजाकिस्तानस्य राष्ट्रपतिना कासिम जोमार्ट-टोकायेव इत्यमुना सह सङ्गम्य, उभयपक्षीय-सम्बन्धानाम् आनुपूर्विक-प्रगतेः सम्यग्-अन्वीक्षणं व्यधायि। प्रधानमन्त्रिणा कजाकिस्तान-देशेन सह भारतस्य अनादि-सांस्कृतिक सम्बन्धानां सुदृढताम् अनुस्मृत्य, अस्मद्-विशिष्ट-सम्बन्धेषु साम्प्रतिक-वर्षेषु सम्भूताम् अनवरतां समभिवृद्धिं प्रति पूर्णः सन्तोषः प्राकाशि। उभयोः धीमतोः नेत्रोः मध्ये राजनीति-वाणिज्य-प्रतिरक्षा-सुरक्षा-सम्पर्क-ऊर्जा-महत्त्वपूर्णखनिज-उद्गामिप्रौद्योगिकी-सृजनात्मक अर्थव्यवस्था-सहित-जनानां मिथः सम्पर्केषु व्यापक-सहयोगाय गम्भीरः विचार-विमर्शः अभवत्। अत्रापि च, प्रधानमन्त्रिणा मिस्र-देशस्य राष्ट्रपतिना अब्देल फतह अल-सीसी-इत्यनेन सह गम्भीरा मन्त्रणा प्रत्यष्ठापि। सामाजिकान्तर्जालीय पटले मोदिना प्रोदीरितं यत् गोष्ठ्याम् अविनाभावेन सम्बद्धाः क्षेत्रीय घटनाक्रमाः, तथा प्रवर्धमाना भारत-मिस्र-संधिः इत्यादयः विषयाः सम्यक् समीक्षिताः। इण्डोनेशिया-देशस्य राष्ट्रपतिना प्रबोवो-सुबियान्तो-इत्यनेन सह निरवृत्तां वार्ताम् अधिकृत्य मोदिना प्रामाण्य-पुरस्सरम् अभिहितं यत् उभौ पक्षौ बहुविध-क्षेत्रेषु स्वाकीयां संधिं पुनरपि समुन्निष्यतः । तेन राष्ट्रपति-प्रबोवो इत्यस्य सहज-सौहार्दम्, भावात्मक-सकारात्मकता, आशावाद्य-उन्मेषश्च भूरिशः प्रशंसितः ।

अपरञ्च, प्रधानमन्त्रिणा फिलीपीन्स-देशस्य राष्ट्रपतिना फर्डिनेंड-आर-मार्कोस इत्यनेन सह उच्च-स्तरीय-सम्भाषणम् समाचरितम्। आसियान-अध्यक्ष-रूपेण फिलीपीन्स-देशस्य ब्रिक्स्-सम्मेलने उपाधि-रहिताम् सहभागितां सः सहर्षम् अन्वमोदत। उभौ नेतारौ द्विपक्षीय-सहयोगे व्याप्ति-ज्ञानेन साधितां सम्पूर्तिं प्रति पूर्ण सन्तोषम् प्रकटितवन्तौ; तथा हि प्रतिरक्षा, सुरक्षा, व्यापार-निवेश, अन्तरिक्ष, रेल-, 'फिनटेक', शिक्षा, पर्यटन, विज्ञान-प्रद्योगिकी, नवोन्मेष, जन-सम्पर्क-क्षेत्रेषु च कूटनीतिक सम्बन्धानाम् अनन्यथासिद्धत्वं सुदृढीकर्तुम् अङ्गीकारं प्रापतुः।

## ब्रिक्स्-घोषणापत्रे 'टी.सी.आई. एम्' इत्यस्य समावेशः भारतस्य महती सम्पूर्तिः- आयुषमन्त्री

पारम्परिक-चिकित्सा-पद्धतीनाम् अन्ताराष्ट्रिय-स्वीकृतिम् उद्घोषयन् आयुष-मन्त्री प्रतापराव जाधवः प्रावोचत् यत् ब्रिक्स्-घोषणापत्रे 'टी.सी.आई. एम्' इत्यस्य समावेशः भारतस्य महती सम्पूर्तिः अस्ति। मन्त्रिणा प्रतिपादितं यत् वैज्ञानिक अनुसन्धानैः गुणवत्ता-नियन्त्रणैः च आयुर्वेद-पद्धतिं विश्व-स्तरे प्रतिष्ठापयितुं प्रशासनम् अनवरतं प्रयतते ।

## गृह-मन्त्रिणः अमित शाहस्य आह्वानम् प्रयोगशाला-निर्मित-वज्राणाम् समग्रा उत्पादन-शृङ्खला भारतस्य प्रभुत्वे एव अवच्छिन्ना तिष्ठेत्



रत्न-आभूषण-क्षेत्रे स्वावलम्बनस्य आह्वानं कुर्वन् गृह-मन्त्री अमित-शाहः मुम्बय्यां उपस्थापयत् यत् प्रयोगशाला-निर्मित-वज्राणां समग्रा पारिस्थितिकी प्रणाली निर्माण-शृङ्खला पूर्णतया भारते एव नियन्त्रिणीया। मन्त्रिणा उद्घोषितं यत् भारतस्य पार्श्वे अस्मिन् अवसरे विजय-प्राप्त्यै पूर्णा क्षमता वर्तते। समारोहे राज्यस्य मुख्यमन्त्री देवन्द्र फडणवीसः उप-मुख्यमन्त्री एकनाथ-शिन्दे च उपस्थितौ आस्ताम्।

# लद्दाख-सौर-ऊर्जा-परियोजना हिमाचलस्य कृते सङ्कटः, परियोजनायाः पुनर्परीक्षणाय मुखरिताः स्वराः

हिमसंस्कृतवार्ताः:- कुल्लू। हिमालयीक्षेत्रं पर्यावरण- संवेदनशील- मण्डलं घोषितम् अपि अत्र आरोप्यमाणाः बृहदाकाराः प्रकल्पाः सर्वतः जन-चिन्तायाः कारणं जाताः। भारत-सर्वकारस्य ऊर्जा-मन्त्रालयस्य 'पावर-ग्रिड-कॉर्पोरेशन' इत्यनेन लद्दाखस्य पाङ्ग-कारगिल-क्षेत्रयोः विंशति- सहस्र- मेगावाट (२०,००० MW) क्षमतायुक्तस्य सौर- ऊर्जा- संयन्त्रस्य स्थापनाय स्वीकृतिः पूर्वमेव दत्ता अस्ति। किन्तु अत्र उत्पादिता विद्युत् लाहुलतः रोहताङ्ग-मार्गेण मनाली- कुल्लू- मण्डी- बिलासपुर- मण्डलानि अतिक्रम्य हरियाणा- राज्यस्य कैथलपर्यन्तम् एक-सहस्र- किलोमीटर- दीर्घं (१००० कि.मी.) प्रवासं कृत्वा प्राप्स्यति, यत्र मुख्य-विद्युत्-ग्रिड स्थापनीयः अस्ति। संवेदनशील-पारिस्थितिकमण्डले सौर-ऊर्जायाः अस्याः विशाल-विद्युत्-सञ्चरण-पङ्क्त्या सम्पूर्णः हिमालयः कम्पितः भविष्यति। शीत-मरुस्थले विविध- हिमनदीनां मुखात् गच्छन्ती इयं पङ्क्तिः हिमाचलस्य सहस्रशः कृषकाणाम् उद्यानपालकानां च कृषि-फल-वाटिका-भूमीः स्वगर्भे समाप्य सद्य- धान्य- फल- शाकानाम् अभावम् उत्पादयिष्यति। अस्याः परियोजनायाः कृते साम्प्रतं 'उच्च- वोल्टता- प्रत्यक्षधारा' सञ्चरणपङ्क्तिः प्रस्ताविता अस्ति, किन्तु निगमः एतां पङ्क्तिं 'प्रत्यावर्ती-धारा' रूपेण परिवर्तयितुं विचारयति। अनेन शत-कोटिशः (१०० अरब) रूप्यकाणाम् अतिरिक्त-व्ययभारः आपतिष्यति तथा च केवलं सञ्चरण-पङ्क्तौ ४५० अरब-रूप्यकाणां व्ययस्य अनुमानं कृतम् अस्ति।

## विपक्षस्य मौनम्, पर्यावरण-विदुषां विकल्पयाचना

अस्याः परियोजनायाः स्वीकृत्या सहैव अस्याः विरोधस्वराः अपि तीव्राः जाताः, किन्तु किमपि विरोधीदलं वक्तुं सन्नद्धं नास्ति। पर्यावरण-प्रेमिणां दृढः विश्वासः अस्ति यत् पर्यावरण-वैज्ञानिकानां परामर्शान् अनुसृत्य अस्याः सञ्चरण-पङ्क्त्याः अन्यविकल्पः अन्वेष्टव्यः येन प्रकृति-मानवयोः क्षतिः न भवेत्। लाहुल-स्पीति-मण्डलस्य केषुचित् स्थानेषु सर्वेक्षणं भूमि-मापनं च कृतम्। कैथल- विद्युत्- ग्रिड- कृते भूमि-अधिग्रहणप्रक्रिया २०२७ पर्यन्तं पूर्णीभविष्यति, यतः अस्य सम्पूर्णप्रकल्पस्य समापनेः लक्ष्यं २०२९ पर्यन्तं निर्धारितम् अस्ति।

## वयं विकास-विरोधिनः न, सर्वकारः विकल्पं पश्येत्- ब्रिगेडियर-खुशहाल-ठाकुरः

कारगिल-विजयी सेवानिवृत्त- ब्रिगेडियर-खुशहालठाकुरः अकथयत् यत् सौर-ऊर्जा-प्रकल्पस्य विद्युत्-सञ्चरण-पङ्क्त्याः विषयः अतीव गम्भीरः अस्ति। सः अवदत्- "वयं विकासस्य विरोधिनः न स्मः, किन्तु सर्वकारेण अस्य पुनर्परीक्षणं कर्तव्यं, विकल्पेषु कार्यं करणीयम्। मण्डी-कुल्लू-जनपदानां जनानां भूमयः पूर्वमेव चतुष्पथमार्गे (फोरलेन) रेलमार्गे च गताः।

# विपक्षनेतुः जयरामठाकुरस्य गर्जना- हिमकेयर-योजनायाः अन्वेषणं कलङ्कयितुं केवलं नाटकम्; २०२७ तमे वर्षे भाजपा-दलस्य भविष्यति सर्वकारः





**हिमसंस्कृतवार्ताः:- मण्डी।** पूर्वमुख्यमन्त्री, विपक्षनेता जयरामठाकुरः नाचन-विधानसभाक्षेत्रे पञ्चायतीराजसंस्थानां नवनिर्वाचित- जनप्रतिनिधीनां सम्मानसमारोहे भागम् अगृह्णात्। सः सर्वान् विजियिनः प्रतिनिधीन अभिनन्द्य पूर्णनिष्ठया, समर्पणेन, जनसेवाभावेन च क्षेत्रस्य विकासाय संलग्नाः भवितुम् आहूतवान्। कार्यक्रमे तस्य आगमने सति स्थानीय-विधायकस्य विनोदकुमारस्य नेतृत्वे तस्य भव्यं स्वागतं विहितम्। समारोहं सम्बोधयन् जयरामठाकुरः सुक्खू- सर्वकारस्य उपरि तीक्ष्णान् प्रहारान् अकरोत्। सः अवदत् यत् पञ्चायतीराजसंस्थाः लोकतन्त्रस्य दृढतमाः शृङ्खलाः सन्ति, किन्तु राज्यसर्वकारेण पञ्चायतनिर्वाचनं स्थगयितुं सर्वे उपायाः प्रयुक्ताः। तस्य मतेन, सर्वोच्चन्यायालयस्य हस्तक्षेपात् परमेव निर्वाचनानि सम्पूर्णानि अभवन्। सः पक्षं कृतवान् यत् निर्वाचने जनतया काङ्ग्रेसदलाय तीव्रा पराजयः दत्ता।

'तालाबन्दी' इति वर्तमान-सर्वकारस्य प्रतिमानम्

जयरामठाकुरेण आरोपः आरोपितः यत् मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः पञ्चायतप्रतिनिधीन् प्रधान-पदे द्रष्टुम् एव न ऐच्छत्। सः प्रोक्तवान् यत् राज्ये वर्तमानसर्वकारस्य प्रतिमानं केवलं 'तालाबन्दी', राजनैतिक-प्रतिशोधस्य च भावना एव सञ्जाता। चतुर्वर्षाणां कार्यकालः पूर्णप्रायः वर्तते, किन्तु विकासदृष्ट्या प्रदेशः अद्यापि तत्रैव तिष्ठति यत्र भाजपासर्वकारः इमं त्यक्तवान् आसीत्। मुख्यमन्त्रिणः अधुनातने देहली-प्रवासे कटाक्षं कुर्वन् विपक्षनेता काङ्ग्रेसदलस्य आभ्यन्तरे गुटबन्दी-भावस्य आरोपं दत्तवान्। सः अवदत् यत् केचन मन्त्रिणः मुख्यमन्त्रिणं पदच्युतं कर्तुं केचन च विधायकाः आत्मानं मन्त्रित्वेन योजयितुं नवदेहलीं गतवन्तः आसन्, किन्तु काङ्ग्रेस-उच्चकनेतृत्वेन राहुलगान्धी-महोदयेन च तेभ्यः मेलनस्य समयः अपि न प्रदत्तः। सः आरोपम् अकरोत् यत् मुख्यमन्त्री जनसभासु विना सांविधानिकप्रक्रियां औपचारिकपत्रं विना च मन्त्रिपदानां वितरणस्य उद्घोषणं करोति, येन दीर्घकालात् प्रतीक्षारताः विधायकाः नैराश्यम् अनुभवन्ति।

## २०२७ तमे वर्षे भाजपा-सर्वकार-निर्माणस्य उद्घोषणा

राजनैतिकतथ्यानाम् उल्लेखं कुर्वन् जयरामठाकुरः प्रोक्तवान् यत् मण्डीमण्डलेन २०१७ तथा २०२२ तमयोः वर्षयोः विधानसभानिर्वाचनेषु भाजपादलाय महत् समर्थनं प्रदत्तम् आसीत्। सः दृढतया अकथयत् यत् २०२७ तमस्य वर्षस्य निर्वाचने मण्डीमण्डलस्य सर्वेषु दशसु (१०) विधानसभा-आसनेषु भाजपा विजयं प्राप्स्यति। सः अवदत् यत् काङ्गड़ामण्डलेऽपि भाजपापक्षे अनुकूलं वातावरणं निर्मितं वर्तते, तत्र च दलं न्यूनातिन्यूनं द्वादशसु (१२) आसनेषु जयं प्राप्स्यति। सः शिमला-हमीरपुर-जिलापरिषदोः निर्वाचनेषु भाजपा-दलस्य विजयस्य दृष्टान्तं दत्त्वा अवदत् यत् मुख्यमन्त्रिणः गृहमण्डले संसदीयक्षेत्रेषु च जनतया काङ्ग्रेस-दलं तिरस्कृतम्। शिमला-मण्डल-परिषदः अध्यक्ष-उपाध्यक्ष-पदयोः उपरि भाजपायाः अधिकारं सः लोकतन्त्रस्य विजयः इति वर्णितवान्।

तेन आरोपः आरोपितः यत् सर्वकारेण सत्ता-बलेन जनप्रतिनिधीनां भर्त्सनस्य भयोत्पादनस्य च प्रयासाः कृताः, किन्तु जनतया प्रतिनिधिभिश्च सुक्खू- सर्वकारस्य विरुद्धं स्पष्टः सन्देशः दत्तः। जयरामठाकुरेण एतदपि निवेदितं यत् राजनैतिक-वैमनस्यस्य कारणात् भाजपा-दलस्य त्रयोदशानां (१३) विधायकानां पूर्व-विधायकानां चोपरि मिथ्या-प्राथमिकी पञ्जीकृता, अधिकारिणश्च कूट-प्रकरणानां निर्माणाय पीड्यन्ते।

# हिमाचलस्य भाग्यपत्रिकायां (Lottery) संस्थानां न्यूना रुचिः; २८ सितम्बर-दिनाङ्कं यावत् प्रसारिता निविदा-तिथिः

हिमसंस्कृतवार्ताः- शिमला।
आर्थिकसङ्कटेन युध्यमानः हिमाचलसर्वकारः अतिरिक्त- राजस्व-सङ्ग्रहणाय सप्तविंशतिवर्षेभ्यः (२७) परं भाग्यपत्रिका-क्रीडां पुनः प्रारब्धुं निर्णयं तु कृतवान्, किन्तु अस्याः योजनायाः क्रियान्वयने प्रथमप्रयासे एव विघ्नः समुत्पन्नः। राष्ट्रिय-स्तरस्य भाग्यपत्रिकासंस्थाभिः निविदाप्रक्रियायां यथोचिता रुचिः न प्रदर्शिता। पर्याप्त-प्रतिसादस्य अभावेन राज्य- भाग्यपत्रिकानिदेशालयेन निविदासमर्पणस्य अन्तिमतिथिः १४ सितम्बरतः २८ सितम्बर २०२६ पर्यन्तं प्रसारिता।
सर्वकारेण अस्याः योजनायाः माध्यमेन प्रारम्भे प्रतिवर्षं प्रायः पञ्चाशत्-कोटि-रूप्यकाणां (५० कोटि) राजस्वसङ्ग्रहस्य लक्ष्यं निर्धारितम् आसीत्। अधिकतम-आयस्य अनुमानं शत-कोटि-रूप्यकाणि (१०० कोटि) यावत् कृतम्। एतादृश्यां स्थितौ संस्थानां न्यूना रुचिः सर्वकारस्य राजस्व-लक्ष्याय प्रथमा महदाह्वानं भूत्वा सम्मुखीभूता। गते मासे नियमान् अधिसूच्य राज्यपालस्य च अनुमत्या वित्त-विभागाधीन-निदेशालयेन राष्ट्रिय-स्तरे ई-निविदा प्रसारिता आसीत्।

**कठोराणि वित्तीय-बन्धनानि संलग्नानि**

संस्थानाम् औदासीन्यस्य पृष्ठे निविदायाः कठोराः वित्तीयनियमाः, अनुज्ञापत्र-शुल्कं, अधिकोष-प्रत्याभूति, राजस्व-वितरण-प्रतिमानं च कारणानि मन्यन्ते। सर्वकारेण पारदर्शकतायै सुरक्षायै च बोलीदातॄणां कृते कठोराः मानदण्डाः रचिताः। विभागीय- अधिकारिणां मतेन यदि २८ सितम्बर-पर्यन्तमपि पर्याप्ताः संस्थाः न आगमिष्यन्ति, तर्हि सर्वकारस्य समक्षं शर्तेषु राजस्व-प्रतिमाने च परिवर्तनस्य विकल्पः स्थास्यति।
भाग्यपत्रिकासु (टिकटेषु) हिमाचल-सर्वकारस्य चिह्नम्, अङ्कीय-हस्ताक्षरं, भाग्यनिर्णयस्य, दिनाङ्कः समयश्च, अधिकतम-विक्रय-मूल्यं च अङ्कितं भविष्यति।

**संस्थानां कृते प्रमुखाः वित्तीय-नियमाः**

> न्यूनतम-सम्पत्तिः- संस्थायाः न्यूनातिन्यूनं ५० कोटि- रूप्यकाणां कुलसम्पत्तिः स्यात्।
> अधिकोष-प्रत्याभूतिः- ३० कोटि-रूप्यकाणाम् अधिकोष-प्रत्याभूतिः अनिवार्या।
> अनुज्ञापत्र-शुल्कम्- वार्षिकम् अनुज्ञापत्र-शुल्कं १० कोटि-रूप्यकाणि भविष्यति, यस्मिन् प्रतिवर्षं ५ प्रतिशतं वृद्धिः भविष्यति।
> राजस्व-अंशभागः- न्यूनातिन्यूनं ६ कोटि-रूप्यकाणां निश्चित-राजस्व-अंशभागः देयः भविष्यति।
> सञ्चालन-अनुभवः- कस्मिंश्चित् राज्ये न्यूनातिन्यूनं वर्षद्वयस्य भाग्यपत्रिका-सञ्चालनस्य अनुभवः अनिवार्यः कृतः।
> सञ्चालनस्वरूपम्- राज्ये अन्तर्जाल-माध्यमेन सह पारम्परिक-पत्रक-माध्यमेन अपि भाग्यपत्रिका सञ्चालिता भविष्यति; एकस्मिन् दिने अधिकतमं द्वादश (१२) वाराः, वर्षे त्रयः एव 'बम्पर-ड्रॉ' आयोजिताः भवितुं शक्ष्यन्ति।

# क्रीडा-मञ्चानां माध्यमेन बालकान् यूनश्च लक्ष्यी कुर्वन्ति आतङ्किनः; संयुक्तराष्ट्र-प्रतिवेदने प्रकटनम्




हिमसंस्कृतवार्ता — न्यूयोर्कः।
संयुक्तराष्ट्र-सुरक्षा-परिषदः आतङ्कवाद-विरोधी-समित्याः कार्यकारी-निदेशालयेन (CTED) प्रकाशितेन एकेन नूतनेन प्रतिवेदनेन स्पष्टीकृतं यत् आतङ्कवादी-समूहाः अधुना बालकान् यूनश्च स्व-जाले पातयितुं क्रीडा-मञ्चानां, वीभत्स-हिंसक-सामग्र्याः, नकारवादि-अन्तर्जाल-उपसंस्कृतेश्च आश्रयं गृह्णन्ति।
“सन्देश-प्रेषणात् परम्- कार्यात्मक-आधारभूत-संरचनात्वेन आतङ्कवादी-दुष्प्रचारः” (Beyond Messaging: Terrorist Propaganda as Operational Infrastructure) इति शीर्षकेण प्रकाशिते अस्मिन् प्रतिवेदने विज्ञापितं यत् आतङ्कवादी-सङ्घटनानि नूतन-सदस्यानां संयोजनाय, कट्टरता-प्रसाराय, धन-सङ्ग्रहणाय, रणनीतिक-योजनाभ्यः, स्व-प्रभाव-क्षेत्रेषु शासन-गतिविधीनां दृढीकरणाय च दुष्प्रचारस्य व्यापकम् उपयोगं कुर्वन्ति। प्रतिवेदनानुसारम् एते समूहाः अस्य दुष्प्रचारस्य उपयोगं केवलं सञ्चार-माध्यमत्वेन न कुर्वन्ति, अपि तु स्व-अभियानानां प्रमुख-आधारभूत-संरचना-रूपेण कुर्वन्ति।

**अन्तर्जाल-मञ्जेषु वर्धते चरमपन्थि-चिन्तनम्**

प्रतिवेदने प्रतिपादितं यत् युवा-सन्ततेः मस्तिष्के प्रभावम् उत्पादयितुं क्रीडा-मञ्चातिरिच्य अन्तर्जाल-पर्यावरणे (Online Ecosystem) हिंसक-चरमपन्थि-विचारधाराणां समन्वयः, तान्त्रिक-लैङ्गिक-हिंसा, महिला-विरोधि-मञ्चानां च दुरुपयोगः महती चिन्तायाः विषयः सञ्जातः अस्ति। विशेषतया आफ्रिका-देशेषु तथा मध्य-दक्षिण-एशिया-क्षेत्रेषु सक्रियाः आतङ्कि-गुल्माः स्थानीय-समस्यानाम् अनुचित-लाभं स्वीकर्तुं, स्वस्य प्रामाणिकतां साधयितुं, धन-सङ्ग्रहं विधातुं च अस्य दुष्प्रचारस्य आश्रयं लभन्ते।
निदेशालयेन सचेतितं यत् आतङ्कि-समूहानां द्रुतगत्या परिवर्तमानानां पद्धतीनां तथा च सदस्य-देशानां, वैधानिक-तन्त्राणां, अङ्कीय-मञ्चानां च प्रतिक्रि या-क्षमतायाः मध्ये महत् ‘अन्तरं’ समुत्पन्नम् अस्ति। प्रतिवेदने अस्य उपरि बलं दत्तं यत् अन्ताराष्ट्रिय-मानवाधिकार-नियमानां परिधौ स्थित्वा आतङ्कवाद-विरोधी-प्रयासेषु दुष्प्रचारः केवलं पाठ्य-सामग्री न मन्तव्यः, अपि तु आतङ्कवादस्य प्रमुख-सञ्चालक-रूपेण मत्वा अस्य निवारणं कर्तव्यम्।

# कृषकाणाम् आय-संवर्धनाय प्रयासाः; मक्का-गोधूमयोः च निर्धारयिष्यते न्यूनतम- समर्थन- मूल्यम्



हिमसंस्कृतवार्ताः- शिमला।
मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः प्रोक्तवान् यत् प्रदेशस्य समृद्धौ कृषकाणां महती भूमिका वर्तते। कृषकाणां परिश्रमेण एव क्षेत्राणि शस्य-श्यामलाणि भवन्ति, ग्रामाणां च अर्थव्यवस्था सुदृढा संजायते। सर्वकारस्य अयं यत्नः अस्ति यत् कृषकाः स्व-शस्यानाम् उचितं मूल्यं प्राप्नुयुः, कृषि- कर्म च तेषाम् आयस्य दृढं साधनं भवेत्। अस्यामेव दिशि सर्वकारः प्राकृतिक-कृषेः प्रोत्साहनेन सह कृषकेभ्यः तेषाम् उपजस्य उत्तमं मूल्यं प्रदातुं विविधान् उपायान् स्वीकरोति। मुख्यमन्त्रिणा उद्घोषितं यत् राज्य-सर्वकारः मक्का-गोधूमयोः शस्याय न्यूनतम-समर्थन-मूल्यं निर्धारयति। अस्याः योजनायाः अन्तर्गतं मक्का- इत्यस्य कृते प्रति-किलोग्रामं पञ्चाशत् (५०) रूप्यकाणि तथा गोधूमस्य कृते अशीतिः (८०) रूप्यकाणि न्यूनतम-समर्थन-मूल्यं निर्धार्यते। सर्वकारस्य मुख्यम् उद्देश्यं कृषकेभ्यः तेषां श्रमस्य श्रेष्ठम् आर्थिकलाभं प्रापयितुम् अस्ति, येन शस्य- विक्रयणकाले तेभ्यः सम्यक् मूल्यं लभ्येत, कृषेः जायमानायाम् आय-राशौ च अभिवृद्धिः स्यात्। मुख्यमन्त्री न्यवेदयत् यत् प्रदेश-सर्वकारः कृषकं ग्रामं च विकासस्य केन्द्र-बिन्दुं मत्वा कार्यं करोति। कृषकाणां श्रमस्य उचितसम्माननं तेषाम् आयसंवर्धनं च सर्वकारस्य प्राथम्यं वर्तते। कृषि- क्षेत्रस्य सुदृढीकरणाय आगामिकालेऽपि कृषक- हिताय आवश्यकाः निर्णयाः स्वीकरिष्यन्ते।

# भारतीय-रेलतन्त्रेण विगत-वर्षापेक्षया पञ्च-दशांश-चतुर्प्रतिशतं वार्षिक-वृद्धिऽर्जिता

भारतीय-रेलतन्त्रेण विगत-वर्षापेक्षया पञ्च-दशांश-चतुर्प्रतिशतं वार्षिक-वृद्धिऽ सम्पाद्य, षड्विंशत्यधिक-द्विसहस्रतमस्य वर्षस्य अगस्त-मासे सप्तत्रिंशदुत्तरैकशत-दशांश-नवमिलियन-टन्मितं पण्य-वहनं कृतम्, यच्च पञ्चविंशत्यधिक-द्विसहस्रतमस्य अगस्त-मासे त्रिंशदधिकैकशत-दशांश-नवटन्परिमितम् आसीत् । रेल-मन्त्रालयेन विज्ञापितं यत् पञ्चविंशत्यधिक-द्विसहस्रतमस्य वर्षस्य अगस्त-मासस्य तुलनया षड्विंशत्यधिक-द्विसहस्रतमस्य वर्षस्य अगस्त-मासे पण्य-राजस्वे षड्-दशमलव-सप्तविंशति-प्रतिशन्मिता वृद्धिः सञ्जाता। इयं वृद्धिः भारतीय-रेलमार्गस्य पण्य-व्यापारस्य नैरन्तर्येण सुदृढीकरणं सूचयति ।

# आपत्काले सङ्कटमोचकः सञ्जातः पाटलीपुत्रस्य महावीर-मन्दिरम्, राघोपुरे त्रिसहस्र-पीडितान् प्राप्ता साहाय्य-सामग्री

## जलप्लावित-क्षेत्रेषु नौकया प्रापिता सेवा; अल्पाहारस्य, मिष्टान्नस्य, पेयजस्य च अभवत् वितरणम्




**पाटलीपुत्रम्। हिमसंस्कृतवार्ताः राघव नाथ झा**

जलप्लावनस्य (बाढ़) विषमासु परिस्थितिषु राघोपुरस्य जलमग्नेषु क्षेत्रेषु पाटलीपुत्र-रेलस्थानकस्थितेन महावीर-मन्दिरेण साहाय्यस्य सेवायाश्च हस्तः प्रसारितः। मन्दिरपक्षतः शनिवासरे राघोपुर-विधानसभाक्षेत्रस्य बहुषु जलप्लावित-भागेषु प्रायः त्रिसहस्रं (३०००) विपद्ग्रस्तेभ्यः जनेभ्यः अल्पाहारः, मिष्टान्नं, मुद्रितं (सीलबन्द) पेयजलं च वितरितम्।

जलमग्न-क्षेत्रेषु साहाय्यं प्रापयितुं कार्यदलः बिदुपुर-प्रखण्डस्य बाजितपुर-भिण्डा-राहत-शिबिरम्, चेचर-घट्टम्, खालसा-घट्टम्, मनियापुरम्, दीघा-घट्टम्, एलसीटी-घट्टं, राघोपुरं च विहाय अनेकेषु स्थानेषु गत्वा निर्धनेभ्यः साहाय्य-सामग्रीं प्रादात्। नौकाभिः गमागमनं कुर्वतां जलेन आक्रान्तानां जनानां पार्श्वेऽपि सहायता प्रापिता। राघोपुरे षड्वीथी-सेतोः (सिक्स लेन सेतु) अधः महादलित-बस्त्यां च अपि सामग्री वितरिता।

साहाय्य-पुटकेषु (पैकेट) खस्ता-कचौरी, मिष्टान्नं, मुद्रितं जलं च सम्मिलितम् आसीत्। अस्मिन् सङ्कटकाले सामग्रीं प्राप्य जनैः महावीर-मन्दिरं प्रति कृतज्ञता प्रदर्शिता। जलप्लावनस्य गम्भीरां स्थितिं दृष्ट्वा 'श्री महावीर स्थान न्यास समित्याः' सचिवेन सायण-कुणाल-महोदयेन पीडितेभ्यः अल्पाहार-वितरणस्य निर्देशः दत्तः आसीत्। अस्य आदेशस्य अनन्तरमेव इदं सेवाभियानं सञ्चालितम्। अस्मिन् अवसरे आर.सी. शेषाद्रिः, अञ्जनी-पाण्डेयः, अनिमेषः, पङ्कज-कुमारः, गोरखनाथ-सिंहः, सुरजीत-मिश्रः इत्येभिः सह स्थानीयाः जनप्रतिनिधयः बहवः नागरिकाश्च उपस्थिताः आसन्।

आपदः अस्यां विपत्तौ पाटलीपुत्र-महावीर-मन्दिरस्य अयं प्रयासः धार्मिकीम् आस्थां मानवीय-सेवया सह सङ्गमयन् दीनेभ्यः जनेभ्यः सान्त्वनायाः साहाय्यस्य च सन्देशं प्रादात्।

# ब्रिक्स्-सम्मेलने मिथिलाचित्रकलायाः चित्रावली विदेशीयानां अतिथीनां मनांसि आकृष्टवती



**मधुबनी ,13/09/2026**
**हिमसंस्कृतवार्ताः- डॉ विमलेश झा**

नवदिल्लीस्थिते भारतमण्डपे प्रचलितस्य ब्रिक्स्सम्मेलनस्य अवसरः मिथिलायाः लोकचित्रकलायाः वैश्विकपरिचयस्य महत्त्वपूर्णः अवसरः अभवत्। मिथिलाचित्रकला विदेशेभ्यः आगतानां विशिष्टातिथीनां मनांसि आकृष्टवती। राष्ट्रियशिल्पसङ्ग्रहालये मिथिलाचित्रकलासंस्थान-मधुबनी इत्यनेन प्रदर्शिता मिथिलायाः लोकपरम्परायाः चित्रावली आकर्षणस्य केन्द्रं जाता। एतेषु चित्रेषु मिथिलायाः पर्वोत्सवाः, लोकजीवनं, धार्मिकपरम्पराः, समृद्धा सांस्कृतिकपरम्परा च मनोहररूपेण चित्रिताः सन्ति। जनता दल-यूनाइटेड् (जदयू) इत्यस्य राष्ट्रियकार्यकारी-अध्यक्षः तथा राज्यसभासदस्यः श्रीसञ्जय कुमार झा महोदयः अस्याः उपलब्धेः विषये गौरवं प्रकटितवान्। स्वस्य सामाजिकमाध्यमसन्देशे सः अवदत् यत् मिथिलायाः प्राचीनचित्रकलायाः समृद्धसांस्कृतिकधरोहरस्य च संरक्षणं संवर्धनं च निरन्तरं प्रचलति। राष्ट्रियशिल्पसङ्ग्रहालये आयोजितायां 'मिथिलायाः लोकपरम्परा-प्रदर्शिन्याम्' प्रदर्शितानि चित्राणि ब्रिक्स्सम्मेलनस्य विदेशीयानां अतिथीनां विशेषाकर्षणस्य केन्द्राणि अभवन्। एतेषां चित्राणां माध्यमेन मिथिलायाः लोकजीवनस्य, पर्वोत्सवानां तथा सांस्कृतिकसमृद्धेः सुन्दरं दर्शनं भवति। विशेषरूपेण उल्लेखनीयमस्ति यत् भारतस्य निर्वाचनायोगेन मिथिलाचित्रकलासंस्थानं, मधुबनी इत्यस्मै पत्रं प्रेषयित्वा पञ्चाशत् चित्राणि उपलब्धानि कर्तुं अनुरोधः कृतः। एतानि चित्राणि देशविदेशेभ्यः आगच्छद्भ्यः गणमान्येभ्यः अतिथिभ्यः प्रदर्शयिष्यन्ते। भारतस्य मुख्यनिर्वाचनायुक्तः श्रीज्ञानेशकुमारः १६ अगस्त् २०२६ दिनाङ्के मिथिला-हाट्, झंझारपुरम् इत्यत्र आयोजिते कार्यक्रमे भागं गृहीतवान्। तत्र मिथिलाचित्रकलासंस्थानेन प्रदर्शितानां मधुबनीचित्राणां निरीक्षणं कृत्वा सः तेषां प्रशंसां कृतवान्। मिथिलाचित्रकलायाः एषा प्रस्तुतिः न केवलं बिहारस्य मधुबनीजनपदस्य गौरवं वर्धयति, अपि तु भारतस्य समृद्धस्य लोककलावैभवस्य अन्ताराष्ट्रियस्तरे परिचयं प्रसारयति।अत्रेदम् उल्लेखनीयं वर्तते यत् ब्रिक्स सम्मेलने पंचाशदधिकप्रतिनिधयः मिथिलायाः लोकपरम्परां दृष्टवन्तः।

# खुटाहाग्रामे जलनिमज्जनेन पञ्चजनानां मृत्युः मृतकपरिजनेभ्यः क्षतिपूर्तिराशिः प्रदत्ता

**भागलपुरम् 13/09/2026 हिमसंस्कृतवार्ताः- डॉ विमलेश झा।** बिहारराज्ये भागलपुरजनपदस्य खुटाहाग्रामे कतिपयदिनपूर्वं घटिते जलनिमज्जनदुर्घटनायाम् एकस्यैव परिवारस्य चतुर्भिःसदस्यैः सह पञ्चजनाः मृत्युमुपगताः। दुर्घटनानन्तरं जनपदप्रशासनेन मृतकानां आश्रितेभ्यः नियमानुसारं क्षतिपूर्तिराशिः प्रदत्ता।

भागलपुरस्य समीक्षाभवने आयोजिते कार्यक्रमे जिलाधिकारी अलंकृता पाण्डे तथा कहल-गाँवक्षेत्रस्य विधायकः अभियन्ता शुभानन्दमुकेशः मृतकानां परिजनेभ्यः क्षतिपूर्तिराशिं प्रदत्तवन्तौ। जिलाधिकारीमहोदया मृतकपरिवारैः सह मिलित्वा शोकसंवेदनां प्रकटितवती। सा अवदत् यत् अस्मिन् दुःखदसमये प्रशासनं पीडितपरिवारैः सह वर्तते तथा नियमानुसारं सर्वसम्भवं साहाय्यं दास्यति।कहलगाँवक्षेत्रस्य विधायकः अभियन्ता शुभानन्द-मुकेशोऽपि मृतकपरिजनैः सह मिलित्वा संवेदनां प्रकटितवान् तथा सर्वसम्भवसहयोगस्य आश्वासनं दत्तवान्। एकस्यैव परिवारस्य चत्वारः सदस्याः एकस्मिन् एव काले मृत्युमुपगताः इति कारणेन खुटाहाग्रामे शोकस्य वातावरणं वर्तते। जनपदप्रशासनेन जनसामान्यं नदीनां, सरसां तथा अन्येषां जलाशयानां समीपे विशेषसावधानतां कर्तुं आह्वानं कृतम्। अधिकारिणःजलप्लावनकाले गभीरे जले प्रवेशं परिहर्तुं, स्वसुरक्षायां विशेषं ध्यानं दातुं च जनान् परामर्शं दत्तवान्।





# दरभङ्गायाः जनप्रतिनिधयः मण्डलाशासनं च उदासीनम्!
# पुस्तकालयस्य मूलम् उद्देश्यं वर्षेभ्यः प्रभावितम्




## मण्डलस्य छात्रेभ्यः अस्य कवाटं कदा पूर्णतया उद्घाटितं भविष्यति? नगरे तीव्रगत्या संवर्धते वैयक्तिक-पुस्तकालयानां व्यवसायः

दरभङ्गा। हिमसंस्कृतवार्ताः राघव नाथ झा
लहेरियासराय-स्तम्भस्थः ऐतिहासिकः कमलानेहरू-स्मारक-पुस्तकालयः साम्प्रतं स्वकीयां दुर्दशां समाश्रित्य चर्चायाः विषयो जातः। पुस्तकप्रेमिणां स्थानीयजनानां चाऽऽरोपो वर्तते यत् यः पुस्तकालयः कदाचित् साहित्यकाराणां छात्राणां च विविधानां प्रवृत्तीनां प्रमुखं केन्द्रम् आसीत्, स सम्प्रति उपेक्षायाः शिकारः सञ्जातः।

अपरतश्च नगरेऽस्मिन् अधुना बृहन्मात्रया वैयक्तिक-पुस्तकालयाः (Private Libraries) प्रचलन्ति, यत्र छात्रेभ्यः पञ्चशततः सार्धैकसहस्रं (५००–१५००) यावत् रूप्यकाणि शुल्करूपेण गृह्यन्ते।

वर्षे १९६४ स्थानीयैः शिक्षाविद्भिः प्रबुद्धजनैश्च स्थापितस्य अस्य पुस्तकालयस्य भाण्डारे प्रायः दश सहस्राणि (१०,०००) पुस्तकानि आसन्, यानि सम्यक् संरक्षणस्याभावात् अद्य विनाशोन्मुखानि सन्ति। प्राप्तानुसारं वर्षे २००७ स्थानीय-विधायकानां विकासकोषेण अस्य जीर्णोद्धारोऽपि कारितः आसीत्। किन्तु गतेषु केषुचित् वर्षेषु पुस्तकालयस्य नियमित-पठन-पाठन-प्रक्रिया मण्डलाशसनेन नगरनिगमेन च प्रभाविता जाता। मण्डलाशसनेन पुस्तकालयस्य तृतीयांश-क्षेत्रम् 'ईवीएम'-गोदामरूपेण परिवर्तितम्, नगरनिगमेन च अवकर-वाहनानां संस्थितिक्षेत्रं (Parking Area) तथा अवकरात् खादनिर्माण-प्रसंस्करण-संयन्त्रं (Waste-to-Compost Unit) पुस्तकालयपरिसरे एव संस्थापितम्।

धूलि-धूसरितानि पुस्तकानि, वाचनालयस्य गतिविधयः प्रभाविताः पुस्तकप्रेमिणाम् अनुसारं पुस्तकेषु धूलिसञ्चयः जातः, पुरातन-मञ्जूषाणां (अलमारिकाणाम्) विकृतत्वात् भवनस्य जीर्णभागानां च कारणात् पुस्तकालयस्य स्थितिः अतीव चिन्तनीया वर्तते। पुस्तकालय-परिसरस्य वाचनालयस्य च बृहद्भागः प्रशासनिक-निर्वाचन-कार्याय उपयुज्यते, येन नियमित-पाठकानां छात्राणां च कृते महती असुविधा समुत्पन्ना वर्तते। स्थानीयजनानां कथनं वर्तते यत् यस्मिन् स्थाने छात्राणां, शोधार्थिनां, साहित्यप्रेमिणां च कृते पठनयोग्यं वातावरणं भवेत्, तत्र अन्यकार्याणां सञ्चालनेन पुस्तकालयस्य मूलमेव उद्देश्यं विनष्टं भवति।

### जीर्णोद्धाराय १२ कोटिरूप्यकाणां प्रावधानम्

दरभङ्गा-नगरनिगमस्य वित्तीयवर्षस्य २०२५-२६ आय-व्ययके (Budget) कमलानेहरू-पुस्तकालयस्य तथा नगरभवनस्य (टाउन हॉल) जीर्णोद्धाराय द्वादश-कोटि-रूप्यकाणां (१२ Crore) प्रावधानं कृतम् आसीत्। सम्प्रति प्रश्नोऽयं वर्तते यत् अस्याः प्रस्तावितायाः राशेः सदुपयोगः धरातले कदा दृश्यमानो भविष्यति, पुस्तकालयश्च आधुनिकं स्वरूपं कदा प्राप्स्यति?

### आधुनिक-ई-पुस्तकालय-निर्माणस्य याचना

पुस्तकप्रेमिणां नागरिकाणां च दृढा याचना वर्तते यत् कमलानेहरू-पुस्तकालयः केवलं भवन-संस्कारेण एव सीमितो न स्यात्। अयम् आधुनिक-ई-पुस्तकालयत्वेन, डिजिटल-अध्ययन-केन्द्रत्वेन, प्रतियोगिता-परीक्षायाः छात्राणां कृते सर्वसुविधायुक्त-वाचनालयत्वेन च विकसितः क्रियेत। लहेरियासराय-स्थितः अयं पुस्तकालयः दरभङ्गायाः साहित्यिक-शैक्षणिक-धरोहरस्य महत्त्वपूर्णम् अङ्गम् आसीत्। अस्मिन् सन्दर्भे अस्य संरक्षायै, नियमित-सञ्चालनाय, समुचित-रखरखावार्थं च मण्डलाशसनेन नगरनिगमेन च दृढः सङ्कल्पः करणीयः। प्रश्नस्तु अयमेव वर्तते यत् दरभङ्गायाः अयं ऐतिहासिकः पुस्तकालयः कदा अस्याः दुर्दशायाः मुक्तिं लप्स्यते, विद्यार्थिभ्यश्च अस्य द्वाराणि कदा पूर्णतया उद्घाटितानि भविष्यन्ति?

# बिहारे शर्करायाः नवोद्योगस्थापनाय
# विशेषाः प्रोत्साहनव्यवस्थाः



पटना/भागलपुर 13/09/2026 हिमसंस्कृतवार्ताः- डॉ विमलेश झा बिहारराज्ये ईक्षु-आधारित-उद्योगानां विकासाय राज्यसर्वकारेण महत्त्वपूर्णः निर्णयः स्वीकृतः। शर्करायन्त्रालयस्थापनाय इच्छुकानां निवेशकानां कृते अधुना एकरूप्यकस्य सांकेतिकमूल्येन चत्वारिंशत् एकडपर्यन्तं भूमिः उपलब्धा भविष्यति। नवशर्करायन्त्रालय-स्थापनाय च राज्यसर्वकारः सप्ततिः कोटिरूप्यकपर्यन्तम् अनुदानम् दास्यति। राज्यसर्वकारेण अस्य उद्देश्येन 'बिहार-ईक्षु-उद्योग-निवेश-प्रोत्साहन-नीतिः-२०२६' कार्यान्विता अस्ति। अस्याः नीतेः प्रमुखं लक्ष्यं राज्ये ईक्ष्वाधारित-उद्योगानां प्रोत्साहनं, नवीनानां शर्करायन्त्रालयानां स्थापना तथा निवेशकानां कृते आवश्यकसुविधानां सरलीकरणं च अस्ति। मुख्यमन्त्रीसम्राट् चौधरीमहोदयस्य निर्देशानन्तरं एषा नीति कार्यान्विता अभवत्। सर्वकारस्य विश्वासः अस्ति यत् नवीननीतेः माध्यमेन बिहारस्य ईक्षूद्योगस्य विस्ताराय गतिः प्राप्स्यते तथा निवेशकानां कृते उद्योगस्थापनं सुलभं भविष्यति। राज्यसर्वकारेण आगामीषु पञ्चसु वर्षेषु एककोटियुवकेभ्यः जीविकोपार्जनस्य अवसरान् प्रदातुं लक्ष्यं निर्धारितम् अस्ति। अस्मिन् एव क्रमे राज्ये दीर्घकालतः पिहिताः शर्करायन्त्रलयान् पुनः प्रारब्धुं योजना अस्ति। तदतिरिक्तं राज्ये पञ्चविंशतिः नवीनशर्करायन्त्रालयानां स्थापनायाः लक्ष्यं निर्धारितम् अस्ति। लक्ष्यस्य शीघ्रपूर्त्ये मुख्यसचिवस्य अध्यक्षतायां उच्चस्तरीयसमितिः गठिता अस्ति। एषा समितिः नवीनशर्करायन्त्रालयानां स्थापनासम्बद्धानां कार्याणां निरीक्षणं करिष्यति तथा प्रक्रियायाः शीघ्रतायै आवश्यककार्याणि सम्पादयिष्यति नवीननीतेः अन्तर्गतं न्यूनतमं ३५०० टीडीसीक्षमतायुक्तानां शर्करायन्त्रालयानां स्थापना भविष्यति। निवेशकाय ७० कोटिरूप्यकपर्यन्तम् अनुदानं प्रदास्यते। एतदनुदानं पञ्चसु समानवार्षिकभागेषु प्रदास्यते। ३५०० टीडीसी. इत्यतः अधिकक्षमतायुक्तानां शर्करायन्त्रालयानां कृते अतिरिक्तप्रोत्साहनस्यापि प्रावधानम् अस्ति। प्रत्येकं १०० टीडीसीइतिअतिरिक्तक्षमतावर्धनस्य कृते सर्वकारः द्विकोटिरूप्यकाणां अतिरिक्तप्रोत्साहनराशिः दास्यति।

एतेन बिहारराज्ये ईक्षूत्पादनस्य, शर्करोद्योगस्य तथा सम्बद्धानां औद्योगिकक्रियाकलापानां विकासाय नूतनाः सम्भावनाः सृजिताः भविष्यन्ति। अपि च ग्रामीणक्षेत्रेषु जीविकोपार्जनस्य अवसराः वर्धिष्यन्ते तथा कृषकानां ईक्षूत्पादनाय अपि प्रोत्साहनं प्राप्स्यते।

# BRICS-सम्मेलनस्य साफल्ये मुख्यमन्त्रिणा सम्राट्-चौधरी-महोदयेन प्रधानमन्त्रिणे मोदि-वर्याय अभिनन्दनानि समर्पितानि



**सक्तोः (सत्तू) मखानस्य च वैश्विक-ख्याति-प्राप्तौ कृतज्ञता व्यक्ता, भारतस्य संवर्धमानां वैश्विक-भूमिकां महत्वपूर्णाम् अवदत्।**

पाटलीपुत्रम्। हिमसंस्कृतवार्ताः राघव नाथ झा

मुख्यमन्त्री सम्राट्-चौधरी नवदेहल्यां भारतस्याध्यक्षतायाम् आयोजिते १८तमे ब्रिक्स-शिखरसम्मेलने (BRICS Summit) प्राप्तां सफलतां 'नवदेहली-घोषणापत्रे' सदस्यदेशानां सर्वसम्मतिं च प्रशंसितवान्। सः अस्यै सिद्धये प्रधानमन्त्रिणे नरेन्द्रमोदिने अभिनन्दनानि समर्पितवान् तथा बिहारस्य पारम्परिक-खाद्यपदार्थयोः सक्तोः (सत्तू) मखानस्य च वैश्विक-स्तरे प्रतिष्ठा-प्राप्तये कृतज्ञतां प्रकटितवान्। मुख्यमन्त्रिणा प्रतिपादितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः कुशल-नेतृत्वे भारतस्य वैश्विक-प्रभावः निरन्तरं सुदृढः जातः। ब्रिक्स-सम्मेलने बहुपक्षीय-सहयोगः, विश्वशान्तिः, संवादः, सन्तुलित-वैश्विकव्यवस्था च इति एतेषु विषयेषु बलं दत्तम्, यत् वर्तमान-अन्ताराष्ट्रिय-परिस्थितौ अतीव प्रासङ्गिकं वर्तते। सः अवदत् यत् सम्मेलने वैश्विक-संस्थानां परिष्कारः (सुधारः), विकासशील-राष्ट्राणां सहभागिता, आतङ्कवादस्य विरुद्धं संयुक्त-प्रयासाः तथा वैश्विक-आर्थिक-स्थिरता इत्यादिषु विषयेषु भारतेन प्रभावि-भूमिका निर्व्यूढा। सः संयुक्तराष्ट्र-सुरक्षापरिषदः (UNSC) स्थायी-सदस्यतायै भारतस्य ब्राजील-देशस्य च दृढ-समर्थनं महत्त्वपूर्णम् अमन्यत। मुख्यमन्त्री अग्रे अवदत् यत् कृत्रिमबुद्धिः (AI), अङ्कीय-तन्त्रज्ञानं (Digital Technology), क्वान्टम-प्रविधिः, नवोन्मेषः, सततविकासः च इत्यादिषु क्षेत्रेषु ब्रिक्स-देशानां पारस्परिकः सहयोगः आगामि-अर्थव्यवस्थां नवां दिशां प्रदास्यति। ऊर्जा-सुरक्षा, न्यायसङ्गत-व्यापारः, वैश्विक-शान्तये संवादः कूटनीतिश्च अपरिहार्या इति प्रतिपाद्य सः भारतस्य योगदानं प्रशंसितवान्। सम्राट्-चौधरी स्पष्टीकृतवान् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः समर्थ-नेतृत्वे भारतस्य वर्धमानः वैश्विक-प्रभावः प्रतिभारतीयाय गौरवस्य विषयः अस्ति। ब्रिक्स-सम्मेलनस्य भव्य-साफल्याय प्रधानमन्त्रिणं प्रति शुभाशयान् समर्प्य सः अवदत् यत् अनेन विश्वपटले भारतस्य नेतृत्वदायिनी भूमिका पुनरपि सुदृढा संजाता।

# शिक्षाविभागस्य अधिकारिभिः सह सांसदस्य समुपवेशनम्

## योजनानां प्रभाविकार्यान्वयनाय विद्यालयेषु च समुचितसुविधाभ्यः बलो दत्तः



दरभङ्गा। हिमसंस्कृतवार्ताः राघव नाथ झा

स्थानीयसांसदेन लोकसभायां भाजपा-सचेतकेन च डॉ. गोपाल जी ठाकुर-महोदयेन शनिवासरे बलभद्रपुर-लहेरियासरायस्थे सांसदीयकार्यालये मण्डलशिक्षापदाधिकारिणा तथा शिक्षाविभागस्य सम्बद्धैः अधिकारिभिः सह मन्त्रणां विधाय मण्डलस्य शिक्षाव्यवस्थायाः समीक्षा कृता। उपवेशने विद्यालयानां शैक्षणिकगुणवत्तायाः, आधारभूतसंरचनायाः, छात्राणां सुविधानां, शिक्षकसम्बद्धानां विषयाणां तथा च केन्द्र-राज्यसर्वकारयोः शिक्षणयोजनानां प्रभाविकार्यान्वयने विस्तारेण विचारविमर्शो जातः। सांसदः डॉ. ठाकुरः अकथयत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः विकसितभारतसङ्कल्पस्य तथा मुख्यमन्त्रिणः सम्राट्-चौधरी-महोदयस्य नेतृत्वे बिहारसर्वकारः शिक्षाव्यवस्थां नवीनां सशक्तां च विधातुं कटिबद्धो वर्तते। दरभङ्गायां केन्द्रीयविद्यालयः, प्रतिमान-उच्चविद्यालयः (Model High School), सरस्वती-विद्यानिकेतनं तथा पी.एम.-श्री-विद्यालयाः इत्यादिकानाम् उपक्रमाणां माध्यमेन छात्रेभ्यः गुणवत्तायुक्तायाः तन्त्रज्ञानयुक्तायाश्च शिक्षायाः उपलब्धीकरणस्य दिशि महत्त्वपूर्णं कार्यं विधीयते। सः अधिकारिणः निर्दिष्टवान् यत् विद्यालयेषु स्मार्ट-कक्ष्याणां, ई-पुस्तकालयानां, नूतनप्रयोगशालानां, विषयविशेषज्ञैः पाठनस्य तथा उपचारात्मक-कक्ष्याणां (Remedial Classes) व्यवस्था सुनिश्चिता क्रियेत, अपि च वैद्यक-अभियान्त्रिक-ओलिम्पियाड्-सदृशप्रतियोगितापरीक्षाणां सिद्धतायै छात्रेभ्यः समुचितं मार्गदर्शनं प्रदीयेत। सांसदेन सर्वेषां सर्वकारीयविद्यालयानां भूमेः सीमान्कनं कृत्वा तान् अतिक्रमणमुक्तान् विधातुं, विद्यालयान् मुख्यमार्गेण सह संयोजयितुं तथा च स्वच्छपेयजलस्य, प्रसाधनस्य, विद्युतः च प्राथमिकसुविधाः निश्चेतुं बलो दत्तः। सः अवदत् यत् मण्डलस्य प्रत्येकस्मै छात्राय श्रेष्ठा शिक्षा, समुचिता अवसराः, उज्ज्वलम् अनागतं च प्रदातुं सर्वकारस्य प्राथमिकं लक्ष्यं वर्तते।

# कर्मचारिणां भविष्यनिधि-अधिकारस्य संरक्षणाय ईपीएफओ-सङ्गठनेन कठोराः प्रक्रियाः आरब्धाः

**भागलपुरम्,13/09/2026**
**हिमसंस्कृतवार्ता - डॉ विमलेश झा**

कर्मचारिणां भविष्यनिधि-अधिकारस्य संरक्षणं सामाजिकसुरक्षायाः विस्तारं च उद्दिश्य कर्मचारीभविष्यनिधिसङ्गठनेन (ईपीएफओ) कठोराः क्रियाः प्रारब्धाः सन्ति। क्षेत्रीयभविष्यनिधिआयुक्तेन श्रीसुनीलकुमारेण विभिन्नसंस्थाकर्मचारिणां भविष्यनिधि-अंशदानस्य प्रेषणपत्राणां तथा अंशदानविवरणस्य परीक्षणं कृतम्। परीक्षणे कतिपयेषु स्थलेषु कर्मचारिणां संख्यायां न्यूनता दृष्टा। पूर्वमासानां तुलनया प्रेषणपत्रेषु कर्मचारिणां संख्या न्यूना इति विवरणं प्रविष्टमिति ज्ञातम्। अतः अर्हाः कर्मचारिणः भविष्यनिधि-सामाजिकसुरक्षायाः परिधेः बहिः न गच्छेयुरिति आशङ्का उत्पन्ना।

ईपीएफओसङ्गठनेन विषयस्य गम्भीरतां स्वीकृत्य भागलपुर,पूर्णिया,किशनगञ्ज, अररिया, सुपौल, कटिहार, जमुई ,सहरसा, मधेपुरा, मुंगेर, खगड़िया,बांका, लक्खीसरायसहितेषु चतुर्दशसु जनपदेषु १५,८७० संस्थाभ्यः सूचनाः प्रेषिताः। एतेषु औद्योगिकक्षेत्रेषु सञ्चाल्यमानाः संस्थाः, निजीविद्यालयाः तथा अन्ये विविधसङ्गठनाः अपि सम्मिलिताः सन्ति। सर्वेभ्यः प्रतिष्ठानेभ्यः स्वकीय-अभिलेखानां पुनः परीक्षणं कर्तुं तथा भविष्यनिधेः परिधौ ये अर्हाः कर्मचारिणः सन्ति, तान् शीघ्रमेव योजयितुं निर्देशः प्रदत्तः।

कर्मचारीनामाङ्कनाभियानस्य अन्तर्गतं येषां प्रतिष्ठानानां कर्मचारिणां नामाङ्कनं पूर्वं भविष्यनिधौ न जातम्, तेऽपि अर्हतां परीक्ष्य भविष्यनिधियोजनया सह सम्बद्धाः कर्तुं शक्यन्ते। अस्मिन् अभियाने नियोजकानां अंशदानस्य कतिपयांशात् नियमानुसारं लाभःप्रदीयते। नियोजकेन स्वकीयः अंशः, नियमानुसारं वृद्धिराशिः तथा शतं रूप्यकाणि प्रशासनिकशुल्करूपेण दातव्यानि सन्ति। एषा प्रक्रिया अक्टोबरमासपर्यन्तं पूर्णीकर्तुं शक्यते।

एषस्य अभियानस्य अन्तर्गतं १ एप्रिल् २००९ तः ३१ मार्च् २०२६ पर्यन्तं ईपीएफओयोजनायाः परिधौ योग्याः सन्तः ये कर्मचारी पूर्वं भविष्यनिधेः लाभात् वञ्चिताः अभवन्, तान् भविष्यनिधिना सह संयोजयितुं लक्ष्यं निर्धारितम् अस्ति। ईपीएफओसङ्गठनेन नगरनिगमः, भवननिर्माणविभागः, डीआरडीए, मनरेगा, पथनिर्माणविभागः इत्यादयः प्रमुखनियोजकाः अपि उत्तरदायित्वेन निर्दिष्टाः सन्ति। एतेषु विभागेषु संविदाकारानां माध्यमेन बहुसंख्यकाः श्रमिकाः कर्मचारिणः च कार्यं कुर्वन्ति। अतः अधिकारिभ्यः निर्देशः प्रदत्तः यत् संविदामाध्यमेन कार्यं कुर्वतः कोऽपि अर्हः कर्मचारी भविष्यनिधिसुविधया वञ्चितः न भवेत्। येषु प्रतिष्ठानेषु अर्हाः कर्मचारिणः भविष्यनिधितः वञ्चिताः सन्ति, तेषां कर्मचारीणां शीघ्रं सङ्गठनेन सह संयोजनमेव अभियानस्य मुख्योद्देश्यम् अस्ति। प्रशासनिकशुल्कं न्यूनीकृत्य शतं रूप्यकाणि निर्धारितानि सन्ति।




# शंखनादसामाजिकसंस्थायाः हिन्दीदिवसस्य पूर्वसन्ध्यायाम् जिलास्तरीयः कविसम्मेलनम्

**हिमसंस्कृतवार्ता नाहनम्।** सामाजिक, साहित्यिक, सांस्कृतिक, रङ्गमञ्चीयक्षेत्रे च कार्यरता राज्यस्तरीय संस्था 'शंखनाद' हिन्दीदिवसस्य पूर्वसन्ध्यायाम् ऐतिहासिक्यां शिवालिक-नगर्यां नाहने एकस्य कविसम्मेलनस्य आयोजनम् अकृत, यस्मिन् जिलायाः विभिन्नभागेभ्यः साहित्यकाराः, कवयः, नवोदितलेखकाश्च भागम् अगृहणन्। शंखनादसामाजिकसंगठनस्य निदेशकसम्पादकस्य डा॓. श्रीकान्तअकेला-महोदयस्य, अध्यक्षस्य नीरजगुप्ता-महोदयस्य च अनुसारम् अस्य भव्यकविसम्मेलनस्य मुख्यअतिथिः शिक्षाविद्, सामाजिकचिन्तकः, समाजसेवी, स्थानीय-औद्योगिक-प्रशिक्षण-संस्थानस्य (ITI) प्रधानाचार्यश्च श्री अशरफ अली आसीत्, यदा तु कुल्लू-नगरात् समागतः ख्यातः आलोचकः, लेखकः, साहित्यकारश्च श्री गणेश गनी अस्य विशिष्टअतिथिः आसीत्। अस्य जिलास्तरीयसम्मेलनस्य अध्यक्षता साहित्य-सङ्गीत-क्षेत्रस्य युवाहस्ताक्षरः श्री दिलीपवशिष्ठ-महोदयः अकरोत्, यदा तु ख्यातः कविः, साहित्यकारः, प्रसिद्धमञ्चसञ्चालकः भुवनजोशी अस्य कविसम्मेलनस्य कुशलं सञ्चालनम् अकरोत्। डा॓. श्रीकान्तअकेला अवदत् यत् अस्य कविसम्मेलनस्य मुख्यविशेषता इयम् आसीत् यत् अत्र सम्भवतः द्वादश (१२) नवोदिताः कवयः, कथाकाराः अपि भागम् गृहीत्वा स्वभावाभिव्यक्त्या श्रोतांसि मुग्धानि अकुर्वन्, ये पश्चात् सम्मानिताः अपि अभूवन्।

कविसम्मेलनस्य मुख्यातिथिः स्वसम्बोधने अवदत् यत् हिन्दी केवलभाषा न अपितु भारतमातुः आत्मा अस्ति, यस्य प्रचारप्रसारणे अस्माभिः सर्वैः स्वं स्वम् योगदानं दातव्यम्। कुल्लू-नगरात् समागतः कविः लेखकः गणेश गनी हिन्दीदिवसस्य तस्य प्रासंगिकतायाः च विषये स्वव्याख्याने अवदत् यत् भारतवर्षे हिन्दीदिवसं केवलम् एकदिवसं यावत् न पालनीयम्, अपितु मनसा, कर्मणा, वचसा च एषा भाषा सदा आत्मसादनीया। अस्माकं कृते हिन्द्याः महत्त्वं सदा तिष्ठेत् यतः एतत् राष्ट्रभाषायाः सम्मानम् अस्ति। कार्यक्रमस्य अध्यक्षता कुर्वन् साहित्यकारः श्री दिलीपवशिष्ठः स्वमन्तव्ये अवदत् यत् हिन्दी अस्माकं आत्मसम्मानेन सह संबद्धा अस्ति तथा च अस्माकं राष्ट्रीयचरित्रस्य, राष्ट्रीयभावस्य च सशक्तप्रहरी अस्ति, अतः हिन्दीमानं अस्माकं कर्म अस्माकं राष्ट्रीयपरिचयं च अस्ति। शंखनादसामाजिकसंगठनस्य निदेशकः स्वसंस्थायाः विविधकार्याणि सर्वान् अवगमयत्, महासचिवः मो. कय्यूम सैय्यदः च अन्ते सर्वेषां प्रति आभारं न्यवेदयत्। अस्मिन् अवसरे कविभिः स्वस्वकाव्यपाठैः उपस्थितानां श्रोतृणां मनोरञ्जनं कृतम्। नवोदितसाहित्यकारेषु तुषारचौहान, अनुजकुमारः, ब्रह्मांशः, गौरवपुण्डीरः, ऋषिकाभगत, शिवांगीशर्मा, शिवानीचौहान, चेतना, गुलशनः, रजनीशः, शाश्वतपुंडीरः आदयः तथा च वरिष्ठसाहित्यकाराः दीपचन्दकौशलः, भुवनजोशी, सरलगौतमः, अर्चनाशर्मा, मीनाक्षीवर्मा, प्रतापपाराशरः, गणेश गनी, अशरफ अली, सुनिताभारद्वाजः, दीपराजविश्वासः, श्रीकान्तअकेला, मुकेशसहोत्रा, मौ कय्यूम सैय्यदः, गिरीशयोगी, चेतनासिंहः, नीरपावनः च काव्यपाठम् अकुर्वन्।




# खण्डस्तरीय-संस्कृत-छात्रस्पर्धानाम् भव्यम् आयोजनम्

**हिमसंस्कृतवार्ताः- डॉ नवीन ममगाई, उत्तराखण्डः।** संस्कृतभाषायाः संरक्षणं, संवर्धनं, प्रचारश्च तथा विद्यार्थिषु भारतीयज्ञानपरम्परायाः, संस्कृतस्य, साहित्यस्य च प्रति अनुरागं वर्धयितुम् उत्तराखण्ड- संस्कृतसंस्थानद्वारा आयोजितायाः खण्डस्तरीय- संस्कृत- छात्रस्पर्धायाः २०२६–२७ आयोजनं सितम्बरमासस्य २३–२४ दिनाङ्कयोः श्रीगरीबदासीय- साधु- संस्कृत- महाविद्यालये, जगजीतपुरे, कनखले, हरिद्वारे भविष्यति।

स्पर्धायाः खण्डसंयोजकेन प्रकाशचन्द्रतिवारी-महोदयेन उक्तं यत् संस्कृतभाषा न केवलं प्राचीनतमा समृद्धा च भाषा अस्ति, अपि तु सा भारतीयज्ञानस्य, दर्शनस्य, साहित्यस्य, संस्कृतेः तथा सनातनपरम्परायाः अमूल्या संवाहिका वर्तते। अतः विद्यार्थिषु संस्कृतभाषायाः प्रति अनुरागं, अध्ययनशीलतां, आत्मविश्वासं, सृजनशीलतां च संवर्धयितुं प्रतिवर्षम् एतादृश्याः स्पर्धाः आयोज्यन्ते। अस्मिन् वर्षे छात्राणां कृते षड्विधासु स्पर्धासु प्रतिभां प्रदर्शयितुं सुअवसरः प्रदास्यते। ताः स्पर्धाः सन्ति-

१. संस्कृत-समूहनाटकम्।२. संस्कृत-समूहनृत्यम्।
३. संस्कृत-समूहगानम्।४. संस्कृत-आशुभाषणम्।
५. संस्कृत-वादविवादः।
६. संस्कृत-श्लोकोच्चारणम्। एतासु विविधासु स्पर्धासु बहादराबाद- विकासखण्डस्य राजकीय- अशासकीय- अन्तर्महाविद्यालयानां, संस्कृतविद्यालयानां, महाविद्यालयानां, विश्वविद्यालयानां, सार्वजनिकविद्यालयानां, विविधशैक्षणिकसंस्थानानां छात्राः उत्साहेन सहभागित्वं करिष्यन्ति। खण्डसंयोजकः प्रकाशचन्द्रतिवारी-महोदयः अवदत् यत् एतादृशाः आयोजनाः विद्यार्थिनां सुप्तप्रतिभानां जागरणाय, आत्मविश्वासस्य अभिवर्धनाय, सृजनात्मकशक्तेः परिष्काराय, सर्वाङ्गीणव्यक्तित्वविकासाय च अत्यन्तम् उपकारकाः भवन्ति। स्पर्धामाध्यमेन विद्यार्थिभ्यः स्वप्रतिभाप्रदर्शनस्य, परस्परं नवीनविचाराणां विनिमयस्य, संस्कृतसंस्कृतेः सान्निध्यस्य च सुअवसरः प्राप्यते। तेन सर्वेभ्यः प्रतिभागिभ्यः छात्रेभ्यः, अध्यापकेभ्यः, अभिभावकेभ्यश्च स्पर्धायां सक्रियसहभागितायै हार्दिकम् आह्वानम् कृतम्। तेन उक्तं यत् संस्कृतं केवलं भाषा नास्ति, अपि तु सा भारतीय- ज्ञान-विज्ञानपरम्परायाः, संस्कृतेः, सभ्यतायाः च शाश्वती संवाहिका अस्ति। अतः संस्कृतस्य संरक्षणं संवर्धनं च अस्माकं सामूहिकं दायित्वम् अस्ति। खण्डशिक्षाधिकारी विनोदकुमारमहोदयस्य मार्गदर्शने अध्यक्षतायां च बहादराबाद-विकासखण्डस्य समस्तेषु शासकीय- अशासकीय- कॉन्वेण्ट- विद्यालयेषु, संस्कृतविद्यालयेषु च प्रधानाचार्येभ्यः अध्यापकेभ्यश्च स्पर्धासु छात्राणां अधिकाधिकसहभागितां सुनिश्चितं कर्तुं निर्देशाः प्रदत्ताः सन्ति। अयं संस्कृत-छात्रस्पर्धामहोत्सवः नूनं विद्यार्थिनां प्रतिभाप्रकाशनस्य, संस्कृतानुरागस्य च संवर्धनस्य सशक्तं सोपानं भविष्यति।

# धावनाङ्कान्मिथिला-सांस्कृतिक-परिषदा भव्य-कविसम्मेलनेन मणिपद्मजयन्तीम् आचरितवतीधावनाङ्कान्



**संवाददाता प्रेरकः च -सौरभः दे**

बोकारोनगरम्। बोकारोनगरे मैथिलीभाषाभाषिणां सुप्रतिष्ठिता संस्था मिथिला-सांस्कृतिक-परिषद् इत्यस्याः तत्त्वावधानेन साहित्य-अकादमी-पुरस्कार-सम्मानितस्य प्रसिद्धमैथिलीसाहित्यकारस्य डा. ब्रजकिशोरवर्मणः 'मणिपद्म' स्मृतिजयन्तीसमारोहः सह मैथिलीकविसम्मेलनं च भव्यतया आयोजितम्। रविवासरे सायंकाले सेक्टर-४-ई-स्थिते मिथिला-एकेडमी-पब्लिक-विद्यालयस्य विद्यापति-सभागारे आयोजिते अस्मिन् कार्यक्रमे विविधाः साहित्यिकाः सांस्कृतिकाश्च कार्यक्रमाः सम्पन्नाः। समारोहस्य उद्घाटनं मुख्यातिथिना वरिष्ठसाहित्यकारेण बुद्धिनाथझा-महोदयेन, मिथिला-सांस्कृतिक-परिषदः पूर्वकार्यकारी-अध्यक्षेन गणेशचन्द्रझा-महोदयेन, परिषदः निदेशक-मण्डलस्य सदस्येन कृष्णचन्द्रझा-महोदयेन, परिषदः वर्तमान-महासचिवेन नीरजचौधरी-महोदयेन, उपाध्यक्षेन श्रवणकुमारझा-महोदयेन, सांस्कृतिककार्यक्रमस्य निर्देशकेन अरुणपाठक-महोदयेन, मिथिला-एकेडमी-पब्लिक-विद्यालयस्य उपाध्यक्षेन बटोहीकुमार-महोदयेन, संयुक्तसचिवेन कार्यक्रमस्य संयोजकेन च सुनीलमोहनठाकुर-महोदयेन, मिथिला-महिला-समितेः अध्यक्षया पूनममिश्रा-महोदयया च संयुक्तरूपेण दीपप्रज्वालनेन तथा मणिपद्मस्य चित्रे माल्यार्पणेन पुष्पार्चनेन च कृतम्। स्वागतभाषणे परिषदः महासचिवः नीरजचौधरी महोदयः मैथिली-साहित्यस्य समृद्धौ मणिपद्मस्य महत्त्वपूर्णम् अवदानं प्रकाशयन् उक्तवान् यत् मिथिला-सांस्कृतिक-परिषद् मणिपद्मजयन्त्यवसरे १९९० तमवर्षात् निरन्तरं साहित्यिककार्यक्रमान् आयोजयति।

## मिथिला-गौरव-सम्मानेन सम्मानितः बुद्धिनाथझा-महोदयः, काव्यपुस्तकस्य विमोचनम्

अस्मिन् अवसरे वरिष्ठसाहित्यकारः बुद्धिनाथझा-महोदयः परिषदः पक्षतः 'मिथिला-गौरव-सम्मानेन' सम्मानितः। कविना डा. रणजीतकुमारझा-महोदयेन बुद्धिनाथझा-महोदयस्य व्यक्तित्वस्य कृतित्वस्य च विषये विस्तरेण प्रकाशः कृतः। तेन उक्तं यत् मैथिली-महाकाव्यस्य 'ॐ महाभारतम्' रचयिता वरिष्ठसाहित्यकारः बुद्धिनाथझा साहित्यस्य प्रायः सर्वासु विधासु निपुणः अस्ति। सः कुशलः रङ्गकर्मी तथा राष्ट्रस्तरीयः मञ्चसञ्चालकः अपि अस्ति। समारोहावसरे कवयित्र्याः कल्पनाझा-महोदयायाः 'हसरतों के बीच' इति काव्यपुस्तकस्य विमोचनमपि सम्पन्नम्। साहित्यलोकस्य संयोजकेन अमनकुमारझा-महोदयेन अस्याः काव्यपुस्तकस्य वैशिष्ट्यं प्रकाशयता उक्तं यत् अस्मिन् काव्यसङ्ग्रहे कवयित्री कल्पनाझा विविधरसपूर्णाभिः कविताभिः स्वकीयां काव्यप्रतिभां प्रदर्शितवती अस्ति।मुख्यवक्ता बुद्धिनाथझा-महोदयः स्वसम्बोधने मणिपद्मस्य व्यक्तित्वस्य कृतित्वस्य च विषये विस्तरेण प्रकाशं कृतवान्। तेन उक्तं यत् मणिपद्मः बहुमुखप्रतिभासम्पन्नः अद्भुतप्रतिभायुक्तश्च साहित्यकारः आसीत्। लोकगाथाम् आधृत्य तेन रचितानि अनेकानि उपन्यासानि अत्यन्तं चर्चितानि अभवन्। तस्य अन्यविधासु रचनास्वपि प्रशंसा प्राप्ता। मणिपद्मस्य रचनासु सामाजिकसरोकारस्य स्पष्टं प्रतिबिम्बं दृश्यते। १९७३ तमे वर्षे 'नैका बनिजारा' इति उपन्यासाय तस्मै प्रतिष्ठितः साहित्य-अकादमी-पुरस्कारः प्रदत्तः।रचनाभिः कविभिः मानवीयसंवेदनानां स्पर्शःद्वितीयसत्रे वरिष्ठसाहित्यकारस्य बुद्धिनाथझा-महोदयस्य अध्यक्षतायां मैथिली-कविसम्मेलनम् आयोजितम्। अस्मिन् कविसम्मेलने कवयित्र्यः कवयितारश्च मानवीयसंवेदनाभिः परिपूर्णाः विविधरसात्मकाः कविताः गीतानि च प्रस्तुत्य श्रोतॄन् सायं विलम्बपर्यन्तम् आनन्दितवन्तः।कवयित्री कल्पनाझा मैथिलीभाषायां 'जो रे चाँद तू कहिहें सजन सं हमर...' तथा 'माय गे तू बकलोल नहि छैं...' इत्यादि कविते प्रस्तुतवती। कविः धनञ्जयकुमारदासः 'गुदगुदी' इति रचनां, डा. रणजीतकुमारझा 'समधि समधिन थारी में...' इति रचनां, गङ्गेशकुमारपाठकः 'ई जुनि बुझि मुन्ना झूठ बजै छी...' इति रचनां च प्रस्तुतवान्।अरुणपाठकेन जाति-धर्मस्य नाम्ना मानवसमाजस्य विभाजनं न करणीयमिति सन्देशयुक्तं सद्भावनागीतं प्रस्तुतम्। पूनमचौधरी 'की बखान करु अपन मिथिला के...' इति गीतं प्रस्तुतवती। भुटकुनझा महोदयेन संवेदना-श्रद्धाञ्जलिः प्रस्तुतः। सुनीलमोहनठाकुरः 'हम ठाढे रही ओ चलिए गेली...' इति रचनां प्रस्तुतवान्। वरिष्ठसाहित्यकारः विजयशङ्करमल्लिकः स्वकीयया मैथिलीकवितया मणिपद्मं स्मरन् तस्य साहित्यिकयोगदानं श्रद्धया स्मृतवान्। तेन मणिपद्मस्य स्मरणे 'ओ मणिपद्म कहाँ आब पाबी, जिनकर गुण अद्यहुं सभ गाबी...' इति भावपूर्णा रचना प्रस्तुतिता।

# विद्याविहारे छात्रसंसदा गृहीतः कार्यभारः

### अलङ्करणसमारोहे छात्रैः प्राप्ता नेतृत्वस्य उत्तरदायित्वस्य च नवीना भूमिका



**हिमसंस्कृतवार्ताः राघव नाथ झा पूर्णिया।** विद्याविहार-रेसिडेन्सियल-विद्यालये (परोरा) शनिवासरे २०२६-२७ सत्रस्य अलङ्करणसमारोहः समुपस्थितः। रविवंशनारायणमिश्र-स्मृति-सभागारे आयोजितेऽस्मिन् समारोहे छात्रपरिषदः नवनिर्वाचितानां पदाधिकारिणाम् अलङ्करणं विहितम्, तथा च छात्रप्रधानमन्त्रिणः अनन्याकिशोरस्य नेतृत्वे छात्रसंसदा कार्यभारः गृहीतः। समारोहस्य शुभारम्भः विद्यालयस्य उभयोः सङ्गीतवृन्दयोः (Bands) प्रस्तुतौ दीपप्रज्वालनेन विद्यालयगीतेन च सह जातः। छात्राणां 'महानन्दा सिम्फनी' इत्यनेन वृन्देन Believer तथा छात्राणां 'कोसी क्रिसेण्डो' इत्यनेन वृन्देन Bones इति सङ्गीतस्य प्रस्तुतिः कृता। २०२६-२७ सत्राय शाहिलरञ्जनः प्रेरणाप्रियदर्शिनी च विद्यालयस्य नायकौ (Captains), श्रुतिसिंहः हर्षितराजश्च उपनायकौ (Vice-Captains) नियुक्तौ। तथैव साध्वीकुमारी अनुकूलचन्द्रश्च क्रीडानायकौ, आदर्शकुमारः प्रतिभाकुमारी च क्रीडोपपादकौ, गुञ्जनसिंहः सांस्कृतिकनायकः, शुभाङ्गीकुमारी सांस्कृतिक-उपपादिका तथा च विक्रमकुमाराय साहित्यिकनायकस्य दायित्वं प्रदत्तम्। छात्रसंसदः उपप्रधानमन्त्रिणौ अदितिः आरवरॉयश्च समेत्य विविधानां विभागानां मन्त्रिणः अपि पदभारं जगृहुः। सर्वे छात्राः स्वकर्तव्यानां निष्ठापूर्वकं निर्वहनार्थं शपथम् अगृह्णन्। प्रधानाचार्येण निखिलरञ्जनेन उक्तं यत् छात्रेभ्यः नेतृत्वदायित्वस्य समर्पणं तेषां व्यक्तित्वविकासाय दायित्वबोधं च दृढीकर्तुं साहाय्यं करोति। विशिष्टातिथ्या डॉ. उषाशरणया प्रतिपादितं यत् नेतृत्वं केवलं पदं नास्ति, अपि तु उत्तरदायित्वस्य अनुकरणीयाचरणस्य च अवसरः वर्तते। विकासकुमारेण लक्ष्यनिर्धारणं, आत्मविश्वासः, अनुशासनं च सफलतायाः कुञ्जिका इति संसूचितम्। विद्यालयस्य सचिवेन अभियन्त्रा राजेशचन्द्रमिश्रेण तथा निदेशकेन अभियन्त्रा आर. के. पॉल-महोदयेन छात्रप्रतिनिधिभ्यः शुभाशयाः समर्पिताः,

# साहित्य-संस्कृतेः समर्पित-साधकस्य अमलकुमारझा-महोदयस्य भव्यं सम्माननम्




## शिम्मर-फाउण्डेशन-संस्थायाः बाबूजीक-पुस्तकालयस्य च संयुक्त-तत्त्वावधाने समारोहः, साहित्यिक-सांस्कृतिक-योगदानस्य उल्लेखः

हिमसंस्कृतवार्ताः राघव नाथ झा

साहित्य-शिक्षा-समाज-संस्कृति-क्षेत्रेषु निरन्तरं सक्रियं भूत्वा महत्त्वपूर्णम् अवदानं प्रदत्तवतः मैथिली-सेविनः श्रीअमलकुमारझा-महोदयस्य रविवासरे राजकुमारगञ्जस्थे बाबूजीक-पुस्तकालयस्य सभागारे भव्यं गरिमामयं च सम्माननं विहितम्। शिम्मर-फाउण्डेशन-दरभङ्गा तथा बाबूजीक-पुस्तकालयस्य संयुक्त-तत्त्वावधाने आयोजितेऽस्मिन् समारोहे साहित्य-संस्कृति-सम्बद्धाः बहवः विद्वांसः, रचनाकाराः, सामाजिक-कार्यकर्तारश्च तस्य दीर्घकालीन-सेवाः संस्मृत्य तस्मै सम्मानम् अयच्छन्।

समारोहस्य अध्यक्षतां ललितानारायण-मिथिला-विश्वविद्यालयस्य मैथिली-विभागस्य भूतपूर्व-विभागाध्यक्षः डॉ. रमण झा अकरोत्। कार्यक्रमस्य शुभारम्भः डॉ. सुषमा झा-महोदयया मङ्गलगीतस्य ‘जय जय भैरव’ इत्यस्य भावपूर्ण-गायनेन अभवत्। तदनन्तरं समागतैः अतिथिभिः दीप-प्रज्वालनेन समारोहस्य विधिवद् उद्घाटनं कृतम्।

बाबूजीक-पुस्तकालयस्य राजेशकुमारसिंह-ठाकुर-महोदयः स्वागत-भाषणेन अतिथीनाम् अभिनन्दनम् अकरोत्। अस्मिन् अवसरे श्रीअमलकुमारझा-महोदयाय अभिनन्दन-पत्रं समर्प्य तस्य साहित्यिक-शैक्षणिक-सामाजिक-सांस्कृतिक-योगदानं प्रति कृतज्ञता प्रदर्शिता।समारोहस्य विशिष्टा गरिमा तदा समेधिता, यदा अतिथीनां पारम्परिक-मिथिला-चित्रकलया, पागेन, उत्तरीय-वस्त्रेण च सम्माननं कृतम्। अस्मिन् आयोजने सम्माननेन सह मिथिलायाः कलायाः, लोकपरम्परायाः, सांस्कृतिक-अस्मितायाश्च सजीवम् अभिव्यक्ति-दर्शनम् अभवत्।

**‘ईदृशं सम्माननं समाजे नूतनां प्रेरणां जनयति’**

अस्मिन् अवसरे शिम्मर-फाउण्डेशन-संस्थायाः संस्थापकः चलच्चित्र-निर्देशकश्च सुमित सुमनः अवदत् यत् कस्यापि व्यक्तेः रचनात्मकस्य सामाजिकस्य च योगदानस्य सार्वजनिकं सम्माननं केवलं तस्य व्यक्तेः उत्सावर्धनं नास्ति, अपि तु इदं समाजे साहित्यं, संस्कृतिं, सकारात्मक-सृजनं च प्रति नूतनां जिज्ञासां प्रेरणां च जनयति।

सः अवदत् यत् अमलकुमारझा-सदृशानां साहित्यं संस्कृतिं च प्रति समर्पितानां विभूतीनां सम्माननं वस्तुतः तस्याः समग्रपरम्परायाः सम्माननमस्ति, यया भाषया, साहित्येन, समाजस्य चेतना च युगपरम्परायां प्रवहति। ईदृशानि आयोजनानि नवसन्ततये स्वभाषायाः, स्वसांस्कृतिक-धरोहरस्य, स्वसमाजस्य च सम्बद्धतायै अवसरं प्रयच्छन्ति।

सुमित सुमनः अवदत् यत् शिम्मर-फाउण्डेशन-संस्था साहित्य-कला-संस्कृति-क्षेत्रेषु सार्थकैः आयोजनैः सकारात्मक-संवादं, सृजनशीलतां, सांस्कृतिक-चेतनां च सुदृढीकर्तुं निरन्तरं प्रयत्नशीला वर्तते।

कार्यक्रमस्य मञ्च-सञ्चालनम् आशुतोष-कुमारेण कृतम्। समारोहे सुशान्त-भास्करः, डॉ. अवनीन्द्रकुमार झा, सुमिता झा, मञ्जर-सुलेमानः, जमील-हसरतः, विजयशङ्कर झा, श्यामानन्द-कुमारः, विजय-मिश्रः, तरुण-मिश्रः, शम्भुनारायण-चौधरी (ठगड़िया), योगानन्द झा इत्येतान् समेत्य साहित्य-शिक्षा-समाज-संस्कृति-क्षेत्राणां बहवः गण्यमान्याः जनाः समुपस्थिताः आसन्।

कार्यक्रमान्ते स्वर्णकिरण झा ‘प्रेरणा’ धन्यवाद-ज्ञापनं कुर्वती सर्वान् अतिथीन्, साहित्य-प्रेमियः, आयोजन-सहयोगिनश्च प्रति कृतज्ञतां प्राकटयत्। आत्मीये गरिमामये च वातावरणे सम्पन्ने समारोहे उपस्थिताः साहित्यकाराः प्रबुद्धजनाश्च श्रीअमलकुमारझा-महोदयस्य साहित्यिकस्य, शैक्षणिकस्य, सामाजिकस्य, सांस्कृतिकस्य च योगदानस्य मुक्तकण्ठेन भूरिशः प्रशंसां कुर्वन्तः तस्य स्वास्थ्याय, सक्रियाय, सृजनशीलाय च जीवनाय शुभाशयाः प्राददुः।

# लनामिवि-दरभङ्गायां 'युवा आपद्-मित्र' प्रशिक्षण-शिविरस्य षष्ठः दिवसः सम्पन्नः

### १४ सितम्बरे तृतीय-प्रशिक्षणशिविरस्य समापनं भविष्यति, सर्वेभ्यः स्वयंसेवकेभ्यः प्रमाणपत्राणि प्रदास्यन्ते।

हिमसंस्कृतवार्ताः राघव नाथ झा। ललितनारायणमिथिलाविश्वविद्यालयस्य राष्ट्रीयसेवाप्रकोष्ठस्य (NSS) तत्त्वावधाने बिहारराज्य-आपतप्रबन्धन-प्राधिकरणस्य (पटना) सौजन्येन विश्वविद्यालय-परिसरे आयोज्यमानस्य द्विशतं (२००) स्वयंसेवकानां सप्तदिवसीय-आवासीय-'युवा आपद्-मित्र'-प्रशिक्षणशिविरस्य षष्ठे दिने कार्यक्रमाणां शुभारम्भः राष्ट्रगीतेन लक्ष्यगीतेन च अभवत्। अस्मिन् अवसरे संयोजकः डॉ. आर. एन. चौरसिया, डॉ. सुधांशु-कुमारः, डॉ. युगेश्वर-साहः, डॉ. कामेश्वर-पासवानः, मनीष-राजः, मणिकांत-ठाकुरः इत्यादयः प्रमुखाः अधिकारिणः उपस्थिताः आसन्। धावनाङ्कान् जल-जीवन-हरियाली सत्रम्: प्रथमसत्रे मलिक-कुमारेण "जल, जीवन और हरियाली" विषये वक्तव्यं दत्तम्। सः अवदत् यत् एते त्रयः विषयाः परस्परं सम्बद्धाः सन्ति तथा च जलरक्षणं वृक्षाणां संवर्धनं च अस्माकं पर्यावरणस्य सन्तुलनाय अनिवार्यम् अस्ति। सः राज्ये प्रवर्तितायाः 'जल-जीवन-हरियाली'-योजनायाः महत्त्वं स्पष्टीकुर्वन् जलसञ्चयस्य वृक्षाणां च भूमिकां प्रतिपादितवान्। धावनाङ्कान् सर्पदंश-प्रबन्धनम्: द्वितीयसत्रे एसडीआरएफ-प्रशिक्षकेन रूपेश-कुमारेण सर्पदंशात् रक्षणस्य उपायाः प्रदर्शिताः। सः अवदत् यत् भारते प्राप्यमाणेषु सर्पेषु १५ प्रतिशतं एव विषधराः भवन्ति। दंशानन्तरं मन्त्र-तन्त्र-झाड़फूङ्क-प्रथां त्यक्त्वा जनैः त्वरितमेव औषधालयः गन्तव्यः। धावनाङ्कान् जले निमज्जन-निवारणं वृक्षारोपणं चः तृतीयसत्रे प्रशिक्षकेण गौरव-कुमारेण बिहारस्य जलप्लावित-क्षेत्रेषु जले निमज्जनात् (डूबना) प्राणानां रक्षणार्थं तरण-कौशलस्य, जागरुकतायाः, प्राथमिकोपचारस्य च उपायाः बोधिताः। ततः सन्तोष-कुमारेण वृक्षारोपणस्य विधिः, कालः, पर्यावरण-सन्तुलने तस्य आवश्यकता च विस्तरेण प्रतिपादिता। धावनाङ्कान् जनसम्मर्द-नियन्त्रणम् (भीड़-प्रबन्धनम्): अन्तिमे सत्रे गौरव-कुमारेण मेलनेषु, उत्सवेषु, यात्रासु च जनसम्मर्द-नियन्त्रणाय स्वयंसेवकानां दायित्वं रेखाङ्कितम्। सः अवदत् यत् केवलं आरक्षकैः (पुलिस) न, अपितु प्रशिक्षित-स्वयंसेवकैः नागरिकाणां सहयोगेन च सङ्कटं निवारयितुं शक्यते।

तदनन्तरं वैभव-झा-महोदयस्य संयोजने छात्रैः उत्कृष्टः सांस्कृतिक-कार्यक्रमः प्रस्तुतः, यस्मिन् मुस्कान, माधवी, काजल, अपर्णा इत्यादयः छात्राः भागं गृहीतवन्तः। प्रातःकाले योग-व्यायामानन्तरं स्वयंसेवकाः विश्वविद्यालययोः परिसरयोः भ्रमणं कृतवन्तः। अस्य प्रशिक्षणशिविरस्य विधिवत् समापनं श्वः १४ सितम्बरे प्रमाण-पत्र-वितरणेन सह भविष्यति।

# मण्डलस्तरीय-विज्ञान-नाट्य-प्रतियोगितायाम् अररिया-सङ्ग्राम-विद्यालयः प्रथमः




## 'एआई : मित्रम्, उपकरणं वा सङ्कटः' विषये छात्राणां प्रभावशालिन्या प्रस्तुत्या निर्णायक-मण्डली मन्त्रमुग्धा

हिमसंस्कृतवार्ताः राघव नाथ झा। मधुबनी। मण्डलस्तरीय-विज्ञान-नाट्य-प्रतियोगितायाम् उत्क्रमित-माध्यमिक-विद्यालयस्य, अररिया-सङ्ग्रामस्य (झंझारपुर-प्रखण्डः) छात्रैः उत्कृष्टं प्रदर्शनं विधाय प्रथमस्थानं सम्प्राप्य विद्यालयस्य झंझारपुर-प्रखण्डस्य च गौरवं वर्धितम्।वाटसन-उच्च-विद्यालयस्य, मधुबनी इत्यस्य सभागारे आयोजितायां प्रतियोगितायां विद्यालयस्य छात्रैः 'एआई : मित्रम्, उपकरणं वा सङ्कटः' इति विषये प्रभावशालि नाटकं मञ्चितम्। नाटकस्य माध्यमेन छात्रैः कृत्रिम-बुद्धिमत्तायाः (AI) वर्धमानः उपयोगः, तस्य सम्भावनाः, तत्सम्बद्धाः सङ्कटाश्च अत्यन्तं सर्जनात्मकतया प्रभावपूर्णतया च प्रदर्शिताः। छात्राणाम् अभिनयस्य, संवादस्य, विषय-प्रस्तुतेश्च दर्शकैः निर्णायकैश्च भूरिशः प्रशंसा कृता।

कार्यक्रमान्ते मण्डल-कार्यक्रम-पदाधिकारिणा (स्थापना) विजेता-दलाय शुभाशयाः दत्ताः, छात्राणाम् अभिनयस्य प्रस्तुतेश्च प्रशंसा विहिता। सः बालकानाम् उत्साहवर्धनं कुर्वन् अवदत् यत् आगामि-सेप्टेम्बर-मासस्य २८ दिनाङ्के दरभङ्गायां आयोज्यमानायां प्रमण्डलस्तरीय-विज्ञान-नाट्य-प्रतियोगितायामपि अनेनैव उत्साहेन आत्मविश्वासेन च प्रदर्शनं कुर्वन्तु तथा च मधुबनी-मण्डलस्य नाम समुज्ज्वलं कुर्वन्तु। सः छात्राणां कृते प्रतियोगितायाः अग्रिम-चरणाय आवश्यकाः परामर्शाः अपि प्राददात्।

प्रतियोगितायां विद्यालयस्य पक्षात् मीनाक्षी कुमारी, अलिजा खान, ब्रजेश कुमारः, खुशी कुमारी, अबु सूफियानः, अंशु कुमारी, विवेक कुमारः तथा शिवानी कुमारी इत्येतान् समेत्य आहत्य अष्ट छात्राः भागम् अगृह्णन्।

नाटकस्य संवाद-लेखनस्य निर्देशनस्य च कार्यं विद्यालयस्य प्रधानाध्यापकेन डॉ. अमितकुमार-पाण्डेयेन तथा सहायक-शिक्षकेन श्रीसूरज-कुमारेण संयुक्ततया कृतम्। तयोः मार्गदर्शने छात्रैः विज्ञान-तन्त्रज्ञान-सदृशः समसामयिकः विषयः नाट्य-प्रस्तुत्या प्रभावी-रीत्या उपस्थापितः।विद्यालयस्य अस्मिन् उपलब्धौ शिक्षकेषु, छात्रेषु, पालकेषु च हर्षोल्लासस्य वातावरणं वर्तते। प्रमण्डलस्तरीय-प्रतियोगितायै विद्यालयस्य दलाय सर्वैः शुभकामनाः प्रदीयन्ते।




# संस्कृतभारती – गुर्जरप्रान्तः

## पञ्चमहालविभागे अभ्यासवर्गः तथा मार्गदर्शनसत्रं सम्पन्नम्

संस्कृतभारती-गुर्जरप्रान्तस्य तत्त्वावधाने पञ्चमहालविभागे एकः विशेषः धावनाङ्कान्अभ्यासवर्गः तथा मार्गदर्शनसत्रम्धावनाङ्कान् उत्साहपूर्णवातावरणे सम्पन्नम्। अस्मिन् वर्गे आहत्य धावनाङ्कान्३८ (अष्टात्रिंशत्) कार्यकर्तारःधावनाङ्कान् समागताः, उपस्थिताः च अभवन्।कार्यक्रमे पञ्चमहालः, दाहोदः तथा महिसागरः इति धावनाङ्कान्त्रयाणां जनपदानां कार्यकर्तारःधावनाङ्कान् उत्साहपूर्वकं उपस्थिताः आसन्।

### उद्घाटनसत्रे प्रमुखोपस्थितिः

अस्मिन् अभ्यासवर्गे संस्कृतभारती-गुर्जरप्रान्तस्य धावनाङ्कान्प्रान्ताध्यक्षः श्रीकृष्णप्रसादः निरौलाजी महोदयःधावनाङ्कान्, धावनाङ्कान्प्रान्तमन्त्री डॉ. रघुराम लश्करी महोदयःधावनाङ्कान्, धावनाङ्कान्प्रान्तसङ्घटनमन्त्री श्री नवीन अत्रि महोदयःधावनाङ्कान्, तथा धावनाङ्कान्पञ्चमहालविभागसंयोजकः डॉ. चिराग पुरोहित महोदयःधावनाङ्कान् प्रमुखतया उपस्थिताः आसन्।

### मार्गदर्शनम् एवं बौद्धिकसत्रम्

धावनाङ्कान्जिला-बौद्धिकप्रमुखः श्री धर्मेन्द्र गुर्जर महोदयःधावनाङ्कान् बौद्धिकसत्रं गृहीतवान् तथा उपस्थितकार्यकर्तृभ्यः मौलिकं मार्गदर्शनं प्रदत्तवान्।

### धावनाङ्कान्पत्राचारशिक्षणम्:धावनाङ्कान्

प्रान्तपत्राचारशिक्षणप्रमुखः धावनाङ्कान्डॉ. दिनेशभाई माछी महोदयःधावनाङ्कान् संस्कृतपत्राचारशिक्षणस्य विषये विशदं मार्गदर्शनं दत्तवान्।

### धावनाङ्कान्अभ्यासवर्गः तथा संस्कृतगौरवपरीक्षा:धावनाङ्कान्

प्रान्तशिक्षणसहमन्त्री धावनाङ्कान्डॉ. दिलीपभाई प्रजापति महोदयःधावनाङ्कान् अभ्यासवर्गस्य उद्देश्यानि तथा संस्कृतगौरवपरीक्षायाः महत्त्वं विषयीकरणं च कृत्वा ओजस्वि उद्बोधनं दत्तवान्।

### जनपदस्तरीय प्रमुखोपस्थितिः

कार्यक्रमे धावनाङ्कान्पञ्चमहालजनपदाध्यक्षः डॉ. महेश पटेल महोदयःधावनाङ्कान्, धावनाङ्कान्पञ्च-महालजनपदसंयोजकः डॉ. मीतेश शर्मा महोदयःधावनाङ्कान्, धावनाङ्कान्दाहोदजन-पदसंयोजकः श्री अभयभाई रावल महोदयःधावनाङ्कान्, तथा धावनाङ्कान्महिसागर-जनपदसंयोजिका डॉ. जागृतिबेन बारोट महोदयाधावनाङ्कान् उपस्थिताः आसन्।

तथैव धावनाङ्कान्पञ्चमहाल, दाहोद तथा महिसागर इति त्रयाणां जनपदानां कार्यकर्तारःधावनाङ्कान् अपि उत्साहेन अभ्यासवर्गे सहभागितां कृतवन्तः।अयं अभ्यासवर्गः कार्यकर्तृणां संस्कृतज्ञानवर्धनाय, सङ्गठनात्मकदक्षताविकासाय, संस्कृतप्रचारकार्यस्य विस्ताराय च अत्यन्तं उपयोगी अभवत्। सर्वेषां कार्यकर्तृणां उत्साहपूर्णसहभागितया कार्यक्रमः सफलतया सम्पन्नः।

# स्नानभोजनाभ्यां प्रारब्धं हरितालिकातीजव्रतम्,
## गङ्गातटेषु विवाहितस्त्रीणां सम्मर्दः, फलानां मूल्येष्वपि वृद्धिः



हिमसंस्कृतवार्ताः डॉ विमलेश झा । अखण्डसौभाग्यस्य कामनया पालितं पावनं हरितालिका-तीज-व्रतम् रविवासरे 'स्नान-भोजन(नहाय-खाय')' इत्यनेन प्रारब्धम्। अस्मिन् अवसरे विवाहितमहिलाः प्रातःकाले गङ्गायां स्नानं कृत्वा विधिविधानपूर्वकं विविधप्रकारकान् पक्वान्नान् निर्मितवत्यः। स्नान-पूजनानन्तरं महिलाः स्वपतिभ्यः भोजनं समर्प्य स्वयं भोजनं कृतवत्यः। भागलपुरनगरस्य बरारीपुलतीर्थम्, सीढीतीर्थम्, एस.एम. महाविद्यालयतीर्थम्, बूढानाथतीर्थम् इत्यादिषु विविधेषु गङ्गातटेषु प्रातःकालादेव श्रद्धालूनां विशेषः समागमः दृष्टः। सोमवासरे व्रतिन्यः महिलाः निर्जलोपवासं करिष्यन्ति। सधवास्त्रियः अखण्डसौभाग्यस्य कामनया एतद् व्रतं कुर्वन्ति। येषां महिलानां प्रथमं तीजव्रतम् अस्ति, तासां कृते अस्य पर्वणः विशेषं महत्त्वं मन्यते,। तीजपर्वणः एकदिनपूर्वं रविवासरे भागलपुरनगरस्यस्य प्रमुखेषु आपणेषु अपि जनसम्मर्दः आसीत्। महिलाभिः वंशपात्राणि, फलानि, मिष्टान्नानि, पूजासामग्री, सौभाग्यसामग्री च क्रीतानि। मेहन्दीलेखनार्थं सौन्दर्यकेन्द्रेष्वपि महिलानाम् अधिका संख्या दृष्टा। पञ्चप्रकारकाणां फलानां, पात्राणां तथा अन्येषां पूजासामग्रीणां च आवश्यकताकारणेन अनेकेषां वस्तूनां मूल्येष्वपि वृद्धिः अभवत्। चर्मटिः पेरूकम् तथा कदलीफलस्य मूल्येषु विशेषा वृद्धिः दृष्टा। मिष्टान्न-विक्रेता हीरालाल साहः अवदत् यत् भागलपुरनगरे अधुना पूर्वापेक्षया निर्मितपक्वान्नानां प्रचलनं वर्धितम् अस्ति। फलविक्रेता सुरेशकुमारस्य कथनानुसारं सामान्यदिनानां तुलनया तीजपर्वणः कारणेन फलानां विक्रयः प्रायः पञ्चगुणितः वर्धितः अस्ति। आवश्यकतामनुसृत्य फलानां मूल्येष्वपि वृद्धिः स्पष्टतया दृश्यते।

# चौरचन-पर्वणि फल-दधि-पारम्परिक-व्यञ्जनैः सुसज्जित-पात्रं
## समर्प्य चन्द्रदेवाय प्रणामः, आस्था-लोकपरम्परयोः अनुपमः सङ्गमः दरभङ्गा




भाद्रपद-शुक्ल-चतुर्थ्याः गोधूलि-वेलायां चौरचन-पर्व-प्रसङ्गे प्राङ्गणे-प्राङ्गणे अरिपन-रेखाङ्कनानि शोभितानि, चन्द्रोदयाकाङ्क्षया च आस्था-पात्राणि सज्जीकृतानि। फल-दधि-पिरुकिया-खाजा-प्रभृतिभिः पारम्परिक-पक्वान्नैः विहितैः व्यञ्जनैः परिपूर्णां पेटिकां (डालीम्) आदाय व्रतिभिः चन्द्रदर्शनं कृतं, भक्तिपूर्वकं च तस्मै अर्घ्यं दत्त्वा प्रणामः निवेदितः।

चन्द्रमसि उदिते सति सर्वत्र श्रद्धा-हर्षयोः भावः प्रगाढो जातः। सज्जिते पात्रे स्थापितानि फल-दधि-पारम्परिक-व्यञ्जनानि न केवलं पूजन-सामग्र्यः, अपि तु लोकजीवनस्य तस्याः सांस्कृतिक-अभिव्यक्तेः प्रतीकानि सन्ति, यस्यां प्रकृतेः उपजः, परिवारस्य समृद्धिः, आराध्यं प्रति कृतज्ञता च युगपदेव दृश्यन्ते। चन्द्रदेवाय अर्घ्य-प्रदानेन साकं परिवारस्य सुख-समृद्धि-यशः-सौभाग्यानां कृते, जीवने च शैत्यस्य सम्प्राप्तये मङ्गलकामना कृता।

चन्द्रदेवस्य स्वरूपं स्मरद्भिः इदं कीर्तितम्—
दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम्।
नमामि शशिनं भक्त्या शम्भोर्मुकुटभूषणम्॥
चौरचन-लोकपरम्परायां चन्द्रदर्शनेन सह स्यमन्तक-मणि-प्रसङ्ग-सम्बद्धः अयं प्रसिद्धः श्लोकोऽपि स्मर्यते—
*सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः।*
*सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः॥*
लोकानुश्रुतौ अस्य श्लोकस्य स्मृत्या मिथ्याकलङ्कात् मुक्ति-प्रार्थना सम्बध्यते। चौरचनस्य इयमेव विशिष्टता यत् चन्द्र-सम्बद्धा लोकश्रद्धा, धार्मिक-विश्वासः, कौटुम्बिक-मङ्गलकामना च एकस्यामेव भावधारायां संविलीना भवन्ति। अरिपनस्य कलात्मक-रेखाणां मध्ये सुसज्जिता फल-दधि-व्यञ्जनानां सामग्री, मृत्पात्राणां सरलता, कौमुद्यां च समर्पितम् अर्घ्यम् अस्य पर्वणः विशिष्टं सांस्कृतिक-सौन्दर्यं संवर्धयन्ति। अत्र चन्द्रमाः न केवलम् आकाशे दृश्यमानः ज्योतिःपिण्डः, अपि तु लोकविश्वासस्य शैत्य-सौम्यता-मङ्गलानां प्रतीकत्वेन विराजते।

चौरचन-परम्परायां पूजन-पात्रम् उत्थाप्य चन्द्रप्रणामस्य दृश्यं परिवार-समाज-सम्बन्धस्य आत्मीया स्मृतिः वर्तते। परम्परागत-क्रमेण प्रवहन्ती इयं पद्धतिः लोकजीवनस्य सांस्कृतिक-सातत्यं जीवन्तं धारयति। चन्द्रिकायां समुत्थापिता सा डाली, यस्यां फल-दधि-पारम्परिक-पक्वान्नानि सञ्चितानि सन्ति, वस्तुतः केवलम् अर्पण-द्रव्याणि न, अपि तु कृतज्ञतायाः, पारिवारिक-कल्याणस्य, लोकसंस्कृतेश्च सजीवाभिव्यक्तिः अस्ति। चन्द्रदेवाय अर्घ्य-समर्पण-वेलायां समुत्थिते हस्तद्वये एका सहजा प्रार्थना अपि निहिता तिष्ठति—जीवनं चन्द्रवत् निर्मलं भवेत्, मनः शीतलं तिष्ठेत्, कुलस्य चाकाशः सर्वदा मङ्गलमयो भूयात्।

**विश्वमोहनझाः**
**स्नातकोत्तर-ज्योतिष-विभागस्य छात्रः,**
**कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः,**



**डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम**

# "संस्कृत- कथामञ्जरी" {१८}
## ।द्वात्रिंशत्पुत्तलिकासिंहासनम्।
## "ब्राह्मणीशापमोचनं नाम द्वादशोपाख्यानम्" (१)

अथ पुनस्तथैव प्रवर्तमानं भोजमन्या पुत्तलिकाऽवदत्- भो राजन्! श्रूयतां- विक्रमादित्ये राज्यं कुर्वति सति तस्य नगरे भद्रसेनो नाम कश्चित् वणिगासीत्। तस्य सम्पदां मर्यादा नाभूत, परं स स्तोकोऽपि व्ययशीलो नासीत्। ततः काले गच्छति भद्रसेनो मृतः। तस्य पुत्रः पुरन्दरः पितुः सर्वस्वं प्राप्य तस्य यथेच्छं त्यागं कर्त्तुमुपक्रान्तवान्। ततः एकदा तस्य प्रियमित्रेण धनदेन भणितं- भो पुरन्दरः! त्वं वणिकपुत्रो भूत्वाऽपि महाक्षत्रियकुमार इव धनव्ययं करोषि, नेतत् वणिककुलसम्भवस्य लक्षणं भवति। वणिकपुत्रेण येन केनापि उपायेन सङ्ग्रह कर्त्तव्यः वराटिकाया अपि व्यये कुण्ठेन भवितव्यम्। उपार्जितं द्रव्यं कदाचित् कस्याश्चिदापदि पुरुषस्योपयोगं व्रजति। अतो बुद्धिमता आपदार्थे धनसङ्ग्रहः कर्तव्यः। उक्तञ्च-
"आपदार्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि।।"
एतद्वचनं श्रुत्वा पुरन्दरः प्राह- भो धनद! उपार्जितं वित्तं कदाचित् कस्याश्चिदापदि उपयोगाय भवति इति यो वदति, स विचारशून्यः प्रतिभाति। यदा आपदः आयास्यन्ति, तदा उपार्जितमपि धनं नङ्क्ष्यति। अतो बुद्धिमता पुरुषेण गतस्य शोकः आगमिनोऽर्थस्य चिन्ता च न कार्य्या, परं वर्तमानमेव विचारणीयम्। यद्भवितव्यं तदनायासेनापि भविष्यति। यद्गन्तव्यं तत् गमिष्येत्येव। एवं पुरन्दरवचनेन धनदो निरुत्तरोऽभूत्। ततः पुरन्दरः पितृद्रव्यस्य सर्वस्य व्ययमकरोत्। ततो निर्धनं पुरन्दरं बन्धुमित्रादयो न मानयन्ति। किं बहुना, तेन सह गोष्ठीम् अपि न कुर्वन्ति। तदा पुरन्दरेण स्वमनसि चिन्तितं- मम हस्ते यावत् धनमासीत्, तावदेते मित्रादयो मम सेवका इव आसन् इदानीं मया सह वाक्यालापमपि न कुर्वन्ति। अथवा यस्यार्थोऽस्ति तस्यैव मित्रादयः सन्ति। इत्येवं विचार्य्यासो देशान्तरं गतः।

# हरितालिका व्रतसमीक्षा

(पर्वविशेषः)

डॉ विमलेश झा,
रमेश कुंज, गंगौली
,सरिसबपाही, मधुबनी, बिहार

*मन्दारमालाकुलितालकायै*
*कपालमालांकितशेखराय।*
*दिव्याम्बरायै च दिगम्बराय*
*नमः शिवायै च नमः शिवाय।।*

भारतीयसंस्कृतौ व्रतानां पर्वणां च महत्त्वपूर्णं स्थानमस्ति। भारतीयजनजीवनं धर्मेण, संस्कृत्या, परम्परया च सदा सम्बद्धम् अस्ति। व्रतानि केवलं धार्मिकानुष्ठानानि न सन्ति, अपि तु तेषु आत्मसंयमः, श्रद्धा, तपस्या, त्यागः, सेवा, सदाचारः, प्रकृतिसंरक्षणं, पारिवारिकसौहार्दं च अन्तर्निहितम् अस्ति। एतेषु व्रतेषु हरितालिकाव्रतम् अत्यन्तं प्रसिद्धं पवित्रं च व्रतम् अस्ति। विशेषतः विवाहिताः स्त्रियः तथा कन्याः श्रद्धया अस्य व्रतस्य अनुष्ठानं कुर्वन्ति।

हरितालिकाव्रतं भाद्रपदमासस्य शुक्लपक्षे तृतीयायां तिथौ आचर्यते। अतः अस्य हरितालिकातृतीया इति नाम अपि प्रसिद्धम् अस्ति। अस्मिन् व्रते देवी पार्वती भगवतः शिवस्य आराधनां कृत्वा स्वाभीष्टं वरं प्राप्तवती इति पौराणिकी कथा प्रचलिता अस्ति। देवी पार्वत्याः कठोरतपसा, अचलभक्त्या, आत्मसंयमेन च भगवान् शिवः प्रसन्नः अभवत्। अतः हरितालिकाव्रतं नारीशक्तेः, पतिव्रतधर्मस्य, श्रद्धायाः, तपस्यायाः च प्रतीकरूपेण स्वीक्रियते।

'हरितालिका' इति शब्दस्य व्युत्पत्तिः अत्यन्तं रुचिकरास्ति। पुराणप्रसिद्धकथानुसारं देव्याः पार्वत्याः सखी तां पितृगृहात् वनं प्रति नीतवती। 'हरणम्' इत्यस्य अर्थः अपहरणम् अथवा नयनम्, 'आलिका' इत्यस्य अर्थः सखी इति स्वीक्रियते। अतः सखी द्वारा पार्वत्याः गुप्तरूपेण नयनात् 'हरितालिका' इति नाम प्रचलितमभवत् इति एकः प्रसिद्धः मतः। अस्य व्रतस्य अन्यत् प्रसिद्धं नाम हरितालिकातृतीया इति। 'तृतीया' इति तिथिनाम अस्ति। भाद्रपदस्य शुक्लपक्षे या तृतीया तिथिः भवति, तस्यां दिने एतद् व्रतं मुख्यतया क्रियते। देशस्य विभिन्नेषु भागेषु अस्य व्रतस्य नाम, पूजा-विधिः, लोकाचारः च किञ्चित् भिन्नः दृश्यते, किन्तु शिवपार्वत्योः आराधना सर्वत्र मुख्यरूपेण वर्तते।

हरितालिकाव्रतस्य मूलाधारः देवीपार्वत्याः जीवनसम्बद्धा पौराणिकी कथा अस्ति। पुराणेषु वर्णितं यत् हिमालयस्य पुत्री पार्वती बाल्यकालादेव भगवान् शिवं पतिरूपेण प्राप्तुम् इच्छति स्म। तस्याः मनसि शिवं प्रति अनन्या भक्तिः आसीत्। किन्तु तस्याः पिता हिमवान् अन्यं वरं चिन्तयितुं प्रवृत्तः अभवत्।

पार्वती शिवमेव पतिरूपेण प्राप्तुम् इच्छन्ती आसीत्। सा शिवप्राप्त्यर्थं घोरं तपः अकरोत्। अनेकानि वर्षाणि सा कठोरतपस्यां कृतवती। भोजनं त्यक्त्वा, कदाचित् पत्राणि भक्षयित्वा, अन्ते निराहाररूपेणापि सा तपस्यां कृतवती इति कथा प्रचलिता अस्ति। तस्याः दृढनिश्चयः, श्रद्धा, संयमः, भक्तिश्च अद्भुता आसीत्।

एकदा पार्वत्याः सख्यः तां पितृगृहात् दूरं वनं प्रति नीतवत्यः। तत्र पार्वती बालुकया शिवलिङ्गं निर्माय भगवतः शिवस्य पूजनं कृतवती। सा उपवासं कृत्वा रात्रौ जागरणमपि अकरोत्। तस्याः कठोरतपसा भगवान् शिवः प्रसन्नः अभवत्। अनन्तरं शिवेन पार्वत्याः मनोऽभिलाषः स्वीकृतः तथा उभयोः विवाहः सम्पन्नः अभवत्।

अतः हरितालिकाव्रतस्य कथा केवलं पौराणिककथा नास्ति। अस्याः कथायाः माध्यमेन दृढसंकल्पः, आत्मविश्वासः, धैर्यम्, भक्तिः, संयमः च मानवजीवने कियत् महत्त्वपूर्णाः सन्ति इति बोध्यते। हरितालिकाव्रतं भाद्रपदमासस्य शुक्लपक्षस्य तृतीयायां तिथौ आचर्यते। हिन्दूपञ्चाङ्गानुसारं तिथिनिर्णयः क्रियते। विभिन्नेषु प्रदेशेषु स्थानीयपरम्परानुसारं पूजासमयः तथा व्रतविधिः किञ्चित् परिवर्तते। सामान्यतः प्रातःकालादेव व्रतस्य आरम्भः भवति।

व्रतिन्यः स्नानं कृत्वा शुद्धवस्त्राणि धारयन्ति। ततः संकल्पं कृत्वा शिवपार्वत्योः पूजां कुर्वन्ति। कतिपयाः स्त्रियः निर्जलोपवासमपि कुर्वन्ति। किन्तु उपवासस्य स्वरूपं व्यक्तेः स्वास्थ्यं, आयुः, शारीरिकक्षमता च दृष्ट्वा निश्चेतव्यम्।

हरितालिकाव्रतस्य धार्मिकमहत्त्वं बहुविधम् अस्ति। प्रथमं तु एतत् व्रतं शिवपार्वत्योः दाम्पत्यजीवनस्य आदर्शं स्मारयति। शिवः शक्त्या विना अपूर्णः इति भारतीयदर्शनस्य महत्त्वपूर्णः सिद्धान्तः अस्ति। शिवशक्त्योः सम्बन्धः सृष्टेः मूलतत्त्वस्य प्रतीकः अस्ति।

पार्वती श्रद्धायाः, शक्तेः, धैर्यस्य च प्रतीकरूपेण पूज्यते। शिवः चेतनतत्त्वस्य, वैराग्यस्य, ज्ञानस्य च प्रतीकरूपेण दृश्यते। उभयोः समन्वयः जीवनस्य सन्तुलनं दर्शयति। व्रतस्य माध्यमेन मनुष्यः आत्मसंयमं शिक्षते। भोजनस्य त्यागः केवलं शारीरिकनियन्त्रणं नास्ति; अपि तु इच्छानां नियन्त्रणस्य प्रतीकः अस्ति। मनः एकाग्रं कृत्वा ईश्वरचिन्तनं करणं व्रतस्य प्रमुखम् उद्देश्यम् अस्ति। हरितालिकाव्रतं भारतीयनारीजीवनस्य महत्त्वपूर्णा धार्मिकपरम्परा अस्ति। विवाहिताः स्त्रियः पतिसौभाग्यस्य, दाम्पत्यसुखस्य, पारिवारिकसमृद्धेः च कामनया एतद् व्रतं कुर्वन्ति। अविवाहिताः कन्याः अपि योग्यवरप्राप्त्यर्थं तथा शिवपार्वत्योः आदर्शदाम्पत्यस्य प्राप्त्यर्थं व्रतं कुर्वन्ति। परन्तु अस्य व्रतस्य महत्त्वं केवलं पत्युः दीर्घायुषः कामनायां सीमितं न करणीयम्। आधुनिकदृष्ट्या अस्य व्रतस्य व्यापकः अर्थः अस्ति। नारी स्वजीवने दृढनिश्चयं, आत्मसम्मानं, धैर्यं, विवेकं, आत्मनिर्भरता च धारयेत्—इत्यपि पार्वत्याः चरित्रात् शिक्षितुं शक्यते।

देवीपार्वती स्वेच्छया स्वजीवनस्य निर्णयं कर्तुम् इच्छति स्म। सा स्वलक्ष्यप्राप्त्यर्थं दीर्घकालं तपः अकरोत्। अतः तस्याः जीवनं नारीणां आत्मबलस्य प्रेरणास्रोतः भवति।

हरितालिकाव्रते प्रातःकाले व्रतिनी स्नानं कृत्वा शुद्धवस्त्राणि धारयति। पूजास्थलं शुद्धं कृत्वा तत्र कलशस्थापनं क्रियते। ततः गणेशस्य पूजनं कृत्वा शिवपार्वत्योः आवाहनं क्रियते।

केषुचित् प्रदेशेषु मृत्तिकया अथवा बालुकया शिवलिङ्गं तथा पार्वतीप्रतिमां निर्माय पूजनं क्रियते। पुष्पैः, पत्रैः, फलैः, धूपैः, दीपैः, नैवेद्यैः च पूजा सम्पन्ना भवति। शिवाय बिल्वपत्रं विशेषतया प्रियं मन्यते। पार्वत्यै विविधप्रकाराणि पुष्पाणि समर्प्यन्ते। पूजायां शिवपार्वतीमन्त्राणां जपः, स्तोत्रपाठः, व्रतकथाश्रवणं च क्रियते। ततः आरतीं कृत्वा देवयोः प्रार्थना क्रियते। रात्रौ जागरणस्य परम्परा अपि कतिपयेषु प्रदेशेषु अस्ति।

हरितालिकाव्रतस्य प्रमुखं वैशिष्ट्यम् उपवासः अस्ति। परम्परया अनेकाः व्रतिन्यः निर्जलोपवासं कुर्वन्ति। 'उपवासः' इत्यस्य वास्तविकः अर्थः केवलं भोजनत्यागः नास्ति। 'उप' इति समीपे, 'वास' इति निवासः। अतः ईश्वरस्य समीपे मनसः स्थितिः उपवासः इत्यस्य आध्यात्मिकः अर्थः अस्ति। यदि मनुष्यः भोजनं त्यक्त्वा क्रोधं, द्वेषं, लोभं, ईर्ष्यां च न त्यजति, तर्हि तस्य व्रतस्य आध्यात्मिकफलम् अल्पं भवति। अतः व्रतस्य वास्तविकं स्वरूपं मनःशुद्धिः, इन्द्रियनिग्रहः, सदाचारः, ईश्वरभक्तिश्च अस्ति।

आधुनिकस्वास्थ्यदृष्ट्या दीर्घकालीनः निर्जलोपवासः सर्वेषां कृते उपयुक्तः न भवेत्। अतः गर्भवतीभ्यः, रोगिभ्यः, वृद्धाभ्यः अथवा दुर्बलशरीरयुक्तेभ्यः व्यक्तिभ्यः चिकित्सकीयपरामर्शं विना कठोरनिर्जलोपवासः न करणीयः। श्रद्धया सह स्वास्थ्यरक्षणमपि आवश्यकम्। हरितालिकाव्रते रात्रिजागरणस्य परम्परा अपि अस्ति। रात्रौ शिवपार्वत्योः भजनं, कीर्तनं, स्तोत्रपाठः, कथाश्रवणं च क्रियते। जागरणस्य उद्देश्यं केवलं निद्रात्यागः नास्ति। अस्य आध्यात्मिकः अभिप्रायः मनसः जागरणम् अस्ति।

मानवः प्रायः अज्ञानस्य, मोहस्य, आलस्यस्य च निद्रायां निमग्नः भवति। ईश्वरस्मरणेन ज्ञानस्य, विवेकस्य, आत्मचेतनायाश्च जागरणं भवति। अतः धार्मिकजागरणं जीवनजागरणस्य प्रतीकत्वेन अपि द्रष्टुं शक्यते। हरितालिकाव्रतं केवलं व्यक्तिगतधार्मिकानुष्ठानं नास्ति। अस्य सामाजिकमहत्त्वमपि अत्यधिकम् अस्ति। अस्मिन् दिने स्त्रियः समूहभूत्वा पूजां कुर्वन्ति, गीतानि गायन्ति, कथाः शृण्वन्ति, परस्परं शुभकामनाः च ददति। अनेन सामाजिकएकता वर्धते। व्रतपर्वणि मातरः कन्याभ्यः परम्पराः शिक्षयन्ति। कन्याः पूजाविधिं, संस्कारान्, लोकगीतानि, धार्मिककथाः च ज्ञातुं शक्नुवन्ति। एवं पीढीतः पीढीं संस्कृतेः संक्रमणं भवति।व्रतानि परिवारस्य सदस्येषु प्रेम, सहयोगः, आत्मीयता च वर्धयन्ति। उत्सवस्य माध्यमेन जनाः परस्परं मिलन्ति। अतः हरितालिकाव्रतं सामाजिकसम्बन्धानां दृढीकरणे अपि सहायकम् अस्ति।भारतीयसंस्कृतेः विशेषता अस्ति यत् धार्मिकपर्वाणि कलया, साहित्येन, संगीतेन, नृत्येन, लोकपरम्पराभिः च सम्बद्धानि भवन्ति। हरितालिकाव्रतमपि अस्मात् परम्परायाः पृथक् नास्ति। अनेकप्रदेशेषु हरितालिकायाः लोकगीतानि प्रसिद्धानि सन्ति। स्त्रियः सामूहिकरूपेण गीतानि गायन्ति। गीतानां माध्यमेन पार्वत्याः तपः, शिवस्य महिमा, सखीनां प्रेम, नारीजीवनस्य सुखदुःखानि च अभिव्यज्यन्ते। मेहन्दी, अलङ्कारः, नूतनवस्त्रधारणम्, पूजा, गीतं, नृत्यं च अस्य पर्वणः सांस्कृतिकस्वरूपं समृद्धं कुर्वन्ति। तथापि बाह्याडम्बरस्य अपेक्षया अन्तःकरणस्य शुद्धिः अधिका महत्त्वपूर्णा इति विस्मर्तुं न उचितम्।

क्रमशः... अग्रिमे पृष्ठे...

भारतीयपरम्परायां प्रकृतिः देवत्वेन पूज्यते। हरितालिकाव्रते अपि प्राकृतिकद्रव्याणां प्रयोगः भवति। पुष्पाणि, पत्राणि, फलानि, मृत्तिका, जलं इत्यादीनि पूजायाः अङ्गानि भवन्ति। अनेन प्रकृतेः प्रति कृतज्ञता व्यक्ता भवति।आधुनिककाले पर्यावरणसंरक्षणस्य विशेषावश्यकता अस्ति। अतः व्रतपर्वणि प्लास्टिक इत्यस्य अत्यधिकप्रयोगः, जलस्य अपव्ययः, रासायनिकद्रव्ययुक्तसामग्रीणां प्रयोगः च परिहर्तव्यः। मृत्तिकया निर्मिताः पूजासामग्रीः, प्राकृतिकपुष्पाणि, पुनःप्रयोज्यपात्राणि च उपयोगं कर्तुं शक्यन्ते।

एवं धार्मिकपरम्परां पर्यावरणहितैषिणीं कर्तुं शक्यते। भारतीयसंस्कृतेः 'माता भूमिः पुत्रोऽहं पृथिव्याः' इति भावना अस्माभिः जीवनव्यवहारे अपि स्वीकर्तव्या। शिवपार्वत्योः सम्बन्धः भारतीयसंस्कृतौ आदर्शदाम्पत्यस्य प्रतीकः मन्यते। शिवः पार्वतीं केवलं पत्नीं न मन्यते, अपि तु शक्तिरूपेण सम्मानयति। पार्वती अपि शिवस्य अर्धाङ्गिनी इति प्रसिद्धा अस्ति। 'अर्धनारीश्वर'रूपेण शिवशक्त्योः अभेदः भारतीयदर्शने अत्यन्तं महत्त्वपूर्णः अस्ति।

अर्धनारीश्वरतत्त्वं सूचयति यत् पुरुषः स्त्री च परस्परं पूरकौ स्तः। परिवारस्य सफलतायै परस्परं सम्मानः, विश्वासः, सहयोगः, संवादः च आवश्यकाः सन्ति। अतः हरितालिकाव्रतस्य वास्तविकः सन्देशः स्वस्थ, सम्मानपूर्णं, प्रेमपूर्णं च दाम्पत्यजीवनं भवितव्यम् इति अपि अस्ति।

आधुनिकजीवनशैली तीव्रगत्या परिवर्तमाना अस्ति। विज्ञानस्य, प्रौद्योगिक्याः, शिक्षायाः, नगरीकरणस्य च प्रभावः समाजे स्पष्टः दृश्यते। तथापि धार्मिकपरम्पराणां महत्त्वं अद्यापि जनजीवने वर्तते। हरितालिकाव्रतम् अपि आधुनिकसमाजे नूतनार्थैः सह जीवति।

अद्य शिक्षिताः महिलाः विविधेषु क्षेत्रेषु कार्यं कुर्वन्ति। ताः परिवारस्य उत्तरदायित्वं निर्वहन्त्यः सामाजिकक्षेत्रे, शिक्षाक्षेत्रे, प्रशासनक्षेत्रे, विज्ञानक्षेत्रे, व्यवसायक्षेत्रे च योगदानं ददति। एतादृशे परिवर्तिते समाजे व्रतानां अर्थः केवलं पारम्परिककामनासु न सीमितः भवेत्।

हरितालिकाव्रतं आधुनिकनारीणां कृते आत्मबलस्य, धैर्यस्य, संकल्पस्य, आत्मसम्मानस्य च प्रतीकं भवितुम् अर्हति। पार्वत्याः चरित्रं दर्शयति यत् दृढसंकल्पयुक्ता नारी कठिनतममपि लक्ष्यं प्राप्तुं शक्नोति। हरितालिकाव्रतस्य आध्यात्मिकसन्देशः अत्यन्तं गम्भीरः अस्ति। मनुष्यस्य जीवनं केवलं भौतिकसुखानां प्राप्त्यर्थं नास्ति। आत्मशुद्धिः, सदाचारः, करुणा, सत्यं, संयमः, सेवा, भक्तिश्च जीवनस्य मूल्यानि सन्ति।

मातुः पार्वत्याः तपः अस्मान् शिक्षयति यत् जीवनस्य महत्त्वपूर्णं लक्ष्यं प्राप्तुं धैर्यं तथा निरन्तरप्रयत्नः आवश्यकः वर्तते। शिवस्य प्रसन्नता दर्शयति यत् शुद्धभावेन कृतस्य प्रयत्नस्य अन्ते फलप्राप्तिः सम्भवति। व्रतस्य माध्यमेन मनुष्यः स्वेच्छया कष्टं स्वीकरोति। एतत् आत्मानुशासनस्य अभ्यासं जनयति। आत्मानुशासनं सफलजीवनस्य आधारः अस्ति। विद्यार्थीभ्यः,गृहस्थेभ्यः, सर्वेभ्यः च एषः सन्देशः उपयोगी अस्ति। देवी पार्वती भारतीयपरम्परायां शक्तितत्त्वस्य प्रतिनिधिः अस्ति। सा दुर्गा, काली, गौरी, उमा, जगदम्बा इत्यादिभिः नामभिः पूज्यते। हरितालिकाव्रते पार्वत्याः कोमलं तथा दृढं रूपं एकत्र दृश्यते। सा पुत्री अस्ति, सा सखी अस्ति, सा तपस्विनी अस्ति, सा पत्नी अस्ति, सा माता अस्ति, सा देवी अपि अस्ति। अतः नारीजीवनस्य विविधपक्षाः पार्वतीचरित्रे समाहिताः सन्ति।

अद्य नारीशक्तेः सम्मानः समाजस्य प्रमुखः विषयः अस्ति। स्त्रीशिक्षा, स्त्रीस्वावलम्बनम्, स्त्रीसुरक्षा, समानावसरः, सम्मानः च सामाजिकविकासस्य आवश्यकानि अङ्गानि सन्ति। हरितालिकाव्रतस्य पार्वतीपूजा नारीशक्तेः सम्मानस्य सांस्कृतिकप्रतीकत्वेन स्वीक्रियते।

कस्यापि परम्परायाः मूल्याङ्कनं केवलं भावनात्मकदृष्ट्या न कर्तव्यम्। तस्याः सामाजिकं, धार्मिकं, वैज्ञानिकं, नैतिकं च पक्षं विचारणीयम्। हरितालिकाव्रतस्य अपि समीक्षात्मकं अध्ययनम् आवश्यकम्।

व्रतस्य सकारात्मकपक्षेषु आत्मसंयमः, मानसिकएकाग्रता, पारिवारिकएकता, सामाजिकसम्बन्धः, सांस्कृतिकसंरक्षणम्, नारीशक्तेः सम्मानः, धार्मिकश्रद्धा च प्रमुखाः सन्ति। परन्तु यदि व्रतं केवलं बाह्याडम्बररूपेण, सामाजिकदबावरूपेण वा क्रियते, तर्हि तस्य मूलभावना नश्यति। विशेषतः स्वास्थ्यहानिकरः अत्यधिकोपवासः न उचितः। धर्मः कदापि शरीरस्य अनावश्यकपीडां प्रोत्साहयितुं न शक्नोति। अतः श्रद्धया सह विवेकस्य समन्वयः आवश्यकः।

अस्य व्रतस्य फलप्राप्तिं केवलं भौतिककामनया सम्बद्धं कृत्वा न द्रष्टव्यम्। व्रतस्य सर्वोच्चं फलम् आत्मसंयमः, मानसिकशान्तिः, सदाचारः, ईश्वरभक्तिः च भवेत्।इत्थं वयं वक्तुं शक्नुमो यत् हरितालिकाव्रतं भारतीयसंस्कृतेः धार्मिकं, सामाजिकं, सांस्कृतिकं, नैतिकं च महत्त्वपूर्णं पर्व अस्ति। अस्य केन्द्रे देवीपार्वत्याः अचलभक्तिः, कठोरतपः, दृढसंकल्पः, आत्मसंयमः च वर्तते। शिवपार्वत्योः दाम्पत्यं स्नेहस्य, विश्वासस्य, परस्परसम्मानस्य, सहकार्यस्य च आदर्शं प्रस्तौति।

हरितालिकाव्रतस्य वास्तविकः सन्देशः केवलं सांसारिककामनापूर्तिः नास्ति। अस्य अन्तर्निहितः सन्देशः अस्ति—दृढसंकल्पेन, संयमेन, श्रद्धया, धैर्येण च जीवनस्य लक्ष्यं प्राप्तुं शक्यते। नारी केवलं परिवारस्य आधारः नास्ति, सा शक्तिः, प्रेरणा, सृजनशक्तिश्च अस्ति। पार्वतीचरित्रं अस्य सत्यस्य उज्ज्वलं उदाहरणम् अस्ति।

आधुनिककाले अस्य व्रतस्य परम्परां संरक्षन्तः अस्माभिः तस्य मूलमूल्यानि अपि जीवने स्वीकरणीयानि। अन्धपरम्परायाः स्थाने विवेकपूर्णश्रद्धा, बाह्याडम्बरस्य स्थाने आन्तरिकशुद्धिः, अस्वास्थ्यकरोपवासस्य स्थाने स्वास्थ्यसचेतना, केवलं व्यक्तिगतकामनायाः स्थाने पारिवारिकसामाजिककल्याणस्य भावना च भवेत्।अतः हरितालिकाव्रतं न केवलं तिथिविशेषे क्रियमाणं धार्मिककर्म, अपि तु नारीशक्तेः, दाम्पत्यसौहार्दस्य, आत्मसंयमस्य, दृढसंकल्पस्य, भारतीयसंस्कृतेः च जीवन्तं प्रतीकम् अस्ति।अन्ते च-

कर्पूरगौरं करुणावतारं
संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे
भवं भवानीसहितं नमामि ॥



## धावनाङ्कान्गणेशवन्दनाधावनाङ्कान्

वन्दे मूषक वाहनं गणपतिं तेजोमयं मंगलम्
आराध्यं हि विनायकं निधिपतिं लम्बोदरं सर्वदा।
पूज्यं रूपमलौकिकं तवजनैस्त्वं सिद्धिदो देव भो!
निर्विघ्नं कुरु सर्वदः शिवसुतः श्रेयो हि कुर्वन्तु मे॥१॥

भक्तार्तिप्रशमं विभुं वरकरं सर्वार्थसंसाधकं
विघ्नानामपहारकं श्रुतिनुतं विश्वैकवन्द्यं विभुम्।
बुद्धिं मे विमलां परां च सततं भक्तिं दृढां देहि भो!
शम्भोः पुत्र दयानिधिः गणपते,कुर्वन्तु मे मंगलम्॥२॥

विघ्नेशं विधिपूजितं सुरवरं विघ्नान्धकारच्छिदं,
संसारार्णवतारकं करुणया लोकैकनाथं विभुम्।
तं नौमीशमहं गणेश चरणौ विघ्नापहं सर्वदा
सद्बुद्धिं च सुखं श्रियं च सुयशो कुर्वन्तु मे मङ्गलम् ॥३॥

सिन्दूरारुणविग्रहं सुरगणैः संसेव्यमानं प्रभुं
दीनानामभयं प्रदं सकलदा भक्तेष्टदं शङ्करम्।
विद्यां मे विनयं विवेकममलं सौभाग्यमारोग्यकं
देवेशं प्रणमामि विघ्नहरणं कुर्वन्तु मे मङ्गलम्॥४॥

ज्ञानं मे विनयं यशश्च सततं धैर्यञ्च सत्याश्रयं
शक्तिं मे शुभबुद्धिमुत्तममतिं भक्तिञ्च नित्यं प्रभो।
आयुष्यं सुखशान्तिमक्षयधनं विद्याञ्च यच्छन्तु माम्।
देवेशं प्रणमामि विघ्नहरणं कुर्वन्तु मे मङ्गलम्॥५॥

डॉ.राजकुमार शाण्डिल्यः ,हिन्दी प्रवक्ता
शिक्षा विभाग चण्डीगढ़ प्रशासन

## वैदिकसंस्कृतभाषास्वरूपविमर्शः

**वेदाः पूर्वमिह स्थिताः श्रुतिमतां वाचः सु सर्वं तत-
स्तेभ्यश्च प्रवहेदिदं सुरभितं नः संस्कृतं पावनम्।
लोकाच्चापि लसत्स्वरूपममलं हित्वा न युक्तं जनैः
संस्कृत्याः प्रसरेच्छया निगदितं रूपं तु भेत्तुं परम्॥**

©वत्सदेसराजः, मण्डी

आदितो वेदाः प्रवृत्ताः तस्माद्वैदिकभाषामूलकमेव संस्कृतभाषायाः प्रादुर्भावस्वरूपमवगन्तव्यम् न तु संस्कृतभाषातः प्रवृत्ता वेदभाषेति कल्पना युक्तियुक्ता वस्तुतो वैदिकभाषैव संस्कृतभाषा-विकासस्याद्याधारभूमिर्यतः कालक्रमेण तस्याः शब्दरचना- प्रयोगव्याकरणादिषु परिष्कारपरम्परया लौकिकसंस्कृतस्य समुज्ज्वलमिदं स्वरूपमभवत् तस्माद्वैदिकभाषाया प्रभावं निराकृत्य केवलं लौकिकभाषारूपेण संस्कृतस्य प्रचारप्रसारं कर्तुमुद्यमो न नाम संस्कृतभाषायाः समग्रस्वरूपावबोधाय पर्याप्तो न च कस्यचिदपि संस्कृतविदुषो मुखादिदं श्रूयते यत्संस्कृतं केवलं लौकिकव्यवहारपर्यवसितं भाषारूपमिति यतो हि यज्ञयागादिकर्मकाण्डप्रयोगेषु मन्त्रब्राह्मण-कल्पसूत्रादिपरम्परासुचास्याः भाषायाः यत् पूर्णं वैज्ञानिकं सुव्यवस्थितं सामर्थ्यसम्पन्नं च स्वरूपं प्रकाशते तदेव तस्याः प्राचीनत्वस्य गाम्भीर्यस्य विशिष्टवैज्ञानिकप्रतिभायाश्च सुदृढं प्रमाणं तस्माद्यथा संस्कृतभाषायाः प्रचारप्रसारसंवर्धनं सर्वथा करणीयं तथैव तस्याः मूलाधारभूतायाः वैदिकभाषायाः प्राचीनवैभवस्य स्वरूपस्य प्रभावस्य च यथोचितं संरक्षणं संवर्धनं प्रतिष्ठापनं च सममेव विधेयमिति॥